CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.
Coll. No. 859

Title Tattvānusandhāna.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 859 Subject: Vedānta.

Title: Tattvānusandhāna.

Author: Mahādeva Sarasvatī Muni. Scribe: —

Date of the work: — Date of the Ms.: V.S. १८८०

Place of the work: — Place of the Ms.: —

Size: 9" by 5" Extent: 58 foll.

Language: Sanskrit Script: Devanāgarī

Remarks: ——

१।२
८
१६ १५
२१
२३
२४ २५ २६ २७ २८
३२
४०
४४
४५
४७
५५

॥माधवानंदसेदंपुस्तकंतत्वानुसंधानाख्यं।

२ श्रोत्रमिति ज्ञानेंद्रियाणामुपलक्षणं॥ वागिति कर्मेंद्रियाणामुपलक्षणं॥ आदिशब्देन मुख्यप्राणो गृह्यते॥
४ अथ साधनचतुष्टयसंपत्त्यनंतरं॥
५ तदर्थं पदार्थज्ञानार्थं॥

॥नत्वानुसंधानं॥ श्रीगणेशाय नमः॥ श्रीसच्चिदानंदो जयतु॥ ब्रह्माहं यत्प्रसादेन मयि विश्वं
॥१॥ प्रकल्पितं॥ श्रीमत्स्वयंप्रकाशाख्यं प्रणौमि जगतां गुरुं॥ १॥ देहो नाहं श्रोत्र
वागादिकानि नाहं बुधिर्नाहमेषा समस्तं॥ नाहं सत्यानंदरूपश्चिदात्मा अज्ञानं
मायासाक्षी केवलो वाहमस्मि॥ २॥ अथ मोक्षस्य वाक्यार्थज्ञानाधीनत्वा
त्तस्य च पदार्थज्ञानाधीनत्वात्तदर्थं तत्पदार्थं निरूपयामः॥ तत्पदार्थस्य ल ५ क्रमेण त्वंपदार्थमपीति भावः॥
क्षणं द्विविधं तटस्थलक्षणं स्वरूपलक्षणं चेति॥ सृष्टिस्थितिलयकारण
त्वं तटस्थलक्षणं॥ यतो वा इमानि भूतानि जायंते येन जातानि जीवंति॥
यत्प्रयंत्यभिसंविशंतीति श्रुतेः॥ तदुक्तं भगवता सूत्रकारेण जन्माद्य ॥१॥

विनाशकाले च यत्प्रयंति यत्प्रतिगच्छंति॥ अभि
संविशंति तादात्म्येन प्रतिपद्यंते॥१

स्य यत इति॥ सत्यं ज्ञानानंदं स्वरूपलक्षणं॥ सत्यं ज्ञानमनंतं ब्रह्म॥ आनंदो
त्यादि ब्रह्मेति व्यजानादिति श्रुतेः॥ उक्तं च॥ आनंदादयः प्रधानस्येति॥ स च द्विवि
धः॥ वाच्यार्थो लक्ष्यार्थश्चेति॥ मायोपहितं चैतन्यं तत्पदवाच्यार्थः॥ माया
विनिर्मुक्तं तु चैतन्यं तत्पदलक्ष्यार्थः॥ अथ केयं माया शृणु॥ यथा शुक्त्यादौ
रजतादि कल्पितं तथा चेतने चैतन्ये कल्पितं॥ इदं सर्वं यदयमात्मेति वे त्मा॥ आ
रु दं सर्वं ब्रह्मैवेदं सर्वं पुरुष एवेदं विश्वं सर्वं खल्विदं ब्रह्म वासुदेवः सर्वं ना
रायणः सर्वमिदं पुराण इत्यादिश्रुतिस्मृतिवाक्यजातैः॥ चेतनस्य चेत
नव्यतिरेकेणाभावप्रतिपादनाच्चेतनाचेतनयोरभेदाद्योगाच्च चेत

२ ज्ञानाभाव एवाज्ञानमितितार्किकमतंनिराकरोति॥

बुध प

तत्त्वानुसंधाने ॥२॥ त्वंनित्यशुद्धमुक्तस्वभावमानंदाद्वयंब्रह्मेत्याद्यनंतविशेषणं॥ अचैतन्य
मज्ञानादिजडजातं॥ अज्ञानंत्रिगुणात्मकंसदसद्भ्यामनिर्वचनीयंभा
वरूपंज्ञाननिवर्त्यं अहमज्ञोनजानामीत्यनुभवात्॥ देवात्मशक्तिंस्वगु
आलिंगितां णैर्निगूढामित्यादिश्रुतेः॥ अज्ञानेनावृतंज्ञानंतेनमुह्यंतिजंतवः॥ ज्ञाने
नतुतदज्ञानंयेषांनाशितमात्मनः इतिस्मृतेश्च॥ तच्चाज्ञानंद्विविधंमा
याविद्याभेदात्॥ शुद्धसत्त्वप्रधानंमायेत्युच्यते॥ मलिनसत्त्वप्रधानं
सदविद्येत्युच्यते॥ जीवेशावाभासेनकरोतिमायाचाविद्याचस्वयमे
वभवतीतिश्रुतेः॥ अथवाज्ञानस्यशक्तिर्द्विविधा॥ ज्ञानशक्तिः क्रि ॥२॥

याशक्तिश्चेति॥ रजस्तमोभ्यामनभिभूतंसत्त्वंज्ञानशक्तिः॥ सत्त्वात्संजायते
ज्ञानमितिस्मृतेः॥ क्रियाशक्तिर्द्विविधा॥ आवरणशक्तिर्विक्षेपशक्तिश्चेतिर
जःसत्त्वाभ्यामनभिभूतंतमआवरणशक्तिः॥ तदुक्तं॥ कृष्णंतम आवरणात्म
न कत्वादिति॥ साचनास्तिनप्रकाशतइतिव्यवहारहेतुः॥ तथाचोक्तं॥ नभातिना
स्तिकूटस्थइत्यापादनमावृत्तिरितितमः॥ सत्त्वाभ्यामनभिभूतंरजोविक्षेपश
क्तिः रजसोलोभएवचेतिस्मृतेः॥ लोभादीनांविक्षेपत्वंप्रसिद्धमेव॥ साचा
काशादिप्रपंचोत्पत्तिहेतुः॥ तदुक्तंच॥ विक्षेपशक्तिर्लिंगादिब्रह्मांडांतंज
गत्सृजेदिति॥ तथाच॥ पूर्वोक्ताज्ञानमावरणशक्तिप्रधानंसदविद्येत्युच्य

तत्त्वानुसंधानं ते ॥ अज्ञानं विक्षेपशक्तिप्रधानं सन्मायेत्युच्यते ॥ एतदभिप्राया स्मृतिरपि ॥ तरत्यवि
॥३॥ द्यां विततां हृदि यस्मिन्निवेशिते ॥ योगी मायाममेयाय तस्मै विद्यात्मने नमः ॥ इत्येवं
रूपा द्रष्टव्या ॥ एवं च मायोपहितं चैतन्यमीश्वरो जगत्कारणमन्तर्यामीत्युच्यते
स एव तत्पदवाच्यार्थः ॥ अविद्योपहितं चैतन्यं जीवः प्राज्ञ इति चोच्यते ॥ तदु
क्तं ॥ तमोरजःसत्त्वगुणा प्रकृतिर्द्विविधा च सा ॥ सत्त्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये
च ते मते ॥ मायाबिम्बो वशीकृत्य तां स्यात्सर्वज्ञ ईश्वरः ॥ अविद्यावशगस्त्वन्यस्त
द्वैचित्र्यादनेकधेति ॥ अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सं
१ संबद्ध इत्यर्थः। निरुद्धः ॥ मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमित्येवमादिश्रुतय उक्ताः ॥३॥

अस्मान्मन्त्रवर्णाद्व्याकृताख्या क्रमणे तस्मर्वेक्तिं सर्वं समुत्पद्यत इत्स
ध्याहृत्यर

आभास एव चैष जीवः परस्यात्मनो जलसूर्यकादिवत्प्रतिपत्तव्यः ॥ न स एव साक्षात् नापि वस्त्वंतरं ॥४

यत एव परस्य प्रतिषेधोपदेश्यो निर्विशेषो यमात्मा ॥ अत एवौपाधिकसविशेषत्वमादाय जलसूर्यकादिवदित्युपमा गृह्यते ४

यथा ह्ययं ज्योतिर्मयो विवस्वान्स्वत एकोपि पर भेदेन भिन्ना अपोऽनुगच्छन् बहुधा क्रियते ॥ एवमजोऽयमात्मा देवः स्वप्रकाश एकोप्युपाधिनाम र्थयाद्येत्रेष्वनुगच्छन्भेदरूपः क्रियत इति योजना ४

निर्भया द्रष्टव्याः ॥ यद्वा यथैक एव देवदत्तः क्रियानिमित्तवशेन पाचकः पाठक इति
व्यपदिश्यते ॥ तथैकमेवाज्ञानं विक्षेपावरणशक्तिनिमित्तभेदेन मायाविद्येति च
तं व्यपदिश्यते ॥ तथा चाविद्याप्रतिबिम्बितं चैतन्यं जीवः ॥ अविद्योपहितं बिम्बचैतन्य
मीश्वरः ॥ आभास एव च ॥ अत एव चोपमा सूर्यकादिवत् ॥ यथा ह्ययं ज्योतिरात्मा विव
स्वानपो भिन्ना बहुधैकोऽनुगच्छन् ॥ उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेव
मजोऽयमात्मा ॥ एक एव तु भूतात्मा भूते भूते व्यवस्थितः ॥ एकधा बहुधा चैव दृश्य
ते जलचन्द्रवदित्यादिश्रुतिस्मृतयोऽत्र सत्त्वात् ॥ अस्मिन्पक्षे जीवस्त्वेक एव तस्मि
न्नन्तःकरणविशिष्टाः प्रमातारो बहवः कल्पिताः ॥ केचित्तु नानाज्ञानं स्वीकृत्य

तत्त्वानुसंधानं चनवदज्ञानसमुदायःसमष्टिस्तदुपहितंचैतन्यमीश्वरः॥एकवृक्षवत्त्वेकमज्ञानं
॥४॥ व्यष्टिस्तदुपहितंचैतन्यंप्राज्ञइतिवदंति॥अन्येतुकारणीभूताज्ञानोपहितंचै
तन्यमीश्वरः॥अंतःकरणोपहितंचैतन्यंजीवः॥कार्योपाधिरयंजीवः कारणो
श्री पाधिरीश्वरइतिवचनादित्याहुः॥सर्वेषांमायोपहितंचैतन्यमीश्वरः॥सच्चाज्ञान पि४
न्वात्तदुपहितस्वरूपेणजगत्कर्ताविक्षेपादिशक्तिमदज्ञानोपहितस्वरूपे
णजगदुपादानकारणमूर्णनाभिवत्॥यथोर्णनाभिःसृजतेगृह्णतेचेत्यादिश्रु ते
तेः॥यःसर्वज्ञःसविश्वकृत्सहिसर्वस्यकर्तेत्यादिश्रुतिभ्यश्च॥एवंसर्वोत्पादी
श्वरादाकाशमुत्पद्यते॥आकाशाद्वायुः॥वायोरग्निः॥अग्नेरापः॥अद्भ्यःपृथिवी ॥४॥

ए
च॥तस्माद्वा एतस्मादात्मनआकाशःसंभूतइत्यादिश्रुतेः॥मायायाःसत्वरज
त स्तमोगुणात्मकत्वात्कार्याण्याकाशादीन्यपिसत्वरजस्तमोगुणात्मका
न्यपंचीकृतानिसूक्ष्मभूतानीतिचवर्णयंति॥एतेभ्यःसूक्ष्मभूतेभ्यःस्थूल
भूतानिसूक्ष्मशरीराणिचसप्तदशलिंगात्मकानिजायंते॥सप्तदशलिंगा
नितु॥ज्ञानेंद्रियाणिपंचकर्मेंद्रियाणिपंच॥मनोबुद्धी॥पंचप्राणाश्चेति॥त
त्राकाशादिसात्विकांशेभ्योव्यस्तेभ्योज्ञानेंद्रियाण्युत्पद्यंते॥आकाशस्यसा स्य
त्विकांशात्श्रोत्रेंद्रियमुत्पद्यते॥वायोःसात्विकांशात्त्वगिंद्रियं॥तेजसःसा
त्विकांशात् चक्षुः॥अपांसात्विकांशाद्रसनं॥पृथिव्याःसात्विकांशाद्घ्राणं

तत्वानुसंधानं ॥ श्रोत्रमाकाशादुत्पाद्यते ॥ आकाशादीनां सात्विकांशेभ्यो मिलितेभ्यो
॥५॥ तः करणमुत्पद्यते तत्संकल्पविकल्पनिश्चयाभिमानानुसंधानरूपवृत्ति
भेदाच्चतुर्विधं ॥ मनोबुधिरहंकारश्चित्तं चेति चतुर्विधं ॥ संकल्पात्मकं मनो
रूपं बुधिनिश्चयरूपिणी ॥ अभिमानात्मकस्त्वहमहंकारः प्रकीर्तितः ॥ अ
नुसंधानरूपं च चित्तमित्यभिधीयते ॥ इति वार्तिककारवचनात् ॥ सर्वेषामा
काशादिराजसांशेभ्यो व्यस्तेभ्यः कर्मेंद्रियाण्युत्पद्यंते ॥ आकाशस्य राजसांशा
द्वागिंद्रियमुत्पद्यते ॥ वायोः राजसांशा[illegible]द्धस्तौ ॥ तेजसो राजसांशात्पा
दौ ॥ अपां राजसांशात्पायुः ॥ पृथिव्या राजसांशादुपस्थः ॥ आकाशादिराज ॥५॥

केचित्तु ॥ अपां राजसांशादुपस्थ उत्पद्यते ॥ पृथिव्या राजसांशात्पायुः ॥ कस्मिंश्चापः प्रति
ष्ठिता इति रेतसीति श्रुतेरिति वदंति ॥ १ क्षेपकः ॥

व२

सांशेभ्यो मिलितेभ्यः प्राण उत्पद्यते ॥ सोपि वृत्तिभेदात्पंचविधः ॥ प्राग्गमन
वान्नासाग्रवर्ती प्राणः ॥ अवाग्गमनवान्पाय्वादिस्थानवर्त्यपानः ॥ विष्वग्गा
मनवान्सर्वशरीरवर्ती व्यानः ॥ ऊर्ध्वगमनवान्कंठस्थ उदानः ॥ अशितपीता
न्नादिसमीकरणकरः शरीरमध्य[illegible]वर्ती समानः ॥ वाक्पाणिपादपायू
पस्थानि कर्मेंद्रियाणि तेषां क्रमेणेत्यादिश्यते ॥ अन्नमयप्राणमयमनोम
यविज्ञानमयानंदमयकोशाः पंचात्रैवांतर्भवंति ॥ वक्ष्यमाणस्थूलश
रीरमन्नमयं कोशः ॥ उक्तं सूक्ष्मशरीरं कोशत्रयात्मकं ॥ कर्मेंद्रियैः सहितः
प्राणः प्राणमयं कोशः ॥ ज्ञानेंद्रियैः सहितं मनो मनोमयं कोशः ॥ ज्ञानेंद्रियैः

ज्ञानेंद्रियैः सहि[illegible]

विज्ञानवान्दियइंतनोतिश्रद्धादिपूर्वकं।
अतोविज्ञानस्यकर्तृत्वंतनुतइति॥१

तत्त्वानुसंधा सहिताबुधिर्विज्ञानमयंकोशः॥अयमेवकर्तृत्वोपाधिः॥विज्ञानंयज्ञंतनुतेइत्या
॥६॥ दिश्रुतेः॥अंतःकरणस्यमनस्त्ववृत्तिर्द्विविधा॥निश्चयवृत्तिःसुखाकारवृत्ति
श्चेति॥निश्चयवृत्तिमदंतःकरणंबुधिरित्युच्यते॥सुखाकारवृत्तिमदंतः
५॥ करणंभोक्तृत्वोपाधिः॥तस्यप्रियमेवशिरः॥मोदोदक्षिणःपक्षः॥प्रमोदउत्त
रःपक्षइत्यादिश्रुतेः॥अयमेवकारणपर्यंतआनंदमयःकोशः॥केचिद्विज्ञा ५
नमानंदमयंकोशंवदंति॥इदंसूक्ष्मशरीरंसप्तदशलिंगंद्विविधंसमष्टि ५॥
त व्यष्टिभेदात्॥अपंचीकृतपंचमहाभूततत्कार्यंसप्तदशलिंगंसमष्टिरित्युच्य
ए ते॥तदुपहितंचैतन्यंहिरण्यगर्भइत्युच्यते॥प्राणसूत्रात्मेतिचज्ञानक्रि ॥६॥

।तस्या[illegible]नंदमयस्यात्मनइष्टपुत्रादिदर्शनजंप्रियंशिरइवशिरःप्राधान्यात्।मोदइतिप्रिय
लाभनिमित्तोहर्षः।सएवप्रकृष्टोहर्षःप्रमोदः।आनंदइतिसुखसामान्यमात्मात्प्रियादीनांसुख
वयवानांतेष्वप्यनुस्यूतत्वादानंदइतिपरंब्रह्म॥५

याशक्तिमदुपहितत्वादपित्वाच्च॥अथवापूर्वोक्तापंचीकृतभूतेभ्यःसर्व
व्यापकंलिंगशरीरंदृश्यतेयोविसन्नंतदेवसमष्टिरित्युच्यते॥समष्टित्वंनाम
गोत्वादिवत्सर्व[illegible]व्यष्टिष्वनुस्यूतत्वं॥तदुक्तं॥तेभ्यःसमभवत्सूत्रंलिंगंस
र्वात्मकंमहदिति॥केचित्तुवनवल्लिंगशरीरसमुदायंसमष्टिरितिव
दंति॥प्रत्येकंलिंगशरीरंव्यष्टिरित्युच्यते॥व्यष्टि[illegible]त्वंनामव्यक्तिवद्व्यावर्त ३५
न त्वं॥तदुपहितंचैतन्यंतैजसइत्युच्यते॥तेजोमयांतःकरणोपाधित्वात्॥सामा
ए३२ न्यविशेषयोरिवजातिव्यक्त्योरिवच॥समष्टिव्यष्ट्योस्तादात्म्याभ्युपगमात्त अंगीकारात्
दुपहितयोस्तैजससूत्रात्मनोरपितादात्म्यं॥तदेवसूक्ष्मशरीरमविद्या

१ए ४भिन्नत्वं

तत्वानुसंधा॰ कामकर्मसहितं पुर्यष्टकमित्युच्यते ॥ ज्ञानेंद्रियपंचकं ॥ कर्मेंद्रियपंचकं ॥ अं
॥७॥ तःकरणचतुष्टयं प्राणपंचकं ॥ भूतसूक्ष्मपंचकं ॥ अविद्याकामकर्म चेत्ये
तान्यष्टौ ॥ तत्र कार्याविद्या दृष्टव्या सा च चतुर्विधा ॥ अनित्ये नित्यत्वबुद्धिः ॥ अ
बु शुचौ शुचित्वबुद्धिः ॥ असुखे सुखत्वबुद्धिः ॥ अनात्मन्यात्मत्वबुद्धिः ॥ तदुक्तं
अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्येति ॥
अस्यार्थः ॥ अनित्ये ब्रह्मलोकादिसंसारफले नित्यत्वबुद्धिरेका विद्या दृष्ट
व्या ॥ अशुचिषु स्वशरीरपुत्रभार्यादिशरीरेषु शुचित्वबुद्धिरपरा २ ॥ दुः
खे दुःखसाधने पुत्रसुखतत्संध नबुद्धिरन्या ३ ॥ अनात्मनि देहेंद्रिया ॥७॥

दिष्वहमित्यात्मबुद्धिरितरा चेत्यविद्या चतुर्विधेति ॥४॥ कामो रागः ॥ कर्म त्रिविधं ॥ संचितमा
गामि प्रारब्धं चेति ॥ स्वकृतं फलमदत्वा दृष्टरूपेण विद्यमानं संचितं कर्म १ ॥ यथा संध्या
वंदनाग्निहोत्राद्यागामस्मिन्नु शरीरे क्रियमाणं कर्म २ ॥ वर्तमानशरीरारंभकं प्रारब्धं मागामि
कर्म ३ ॥ संचितागामिकर्मणोः फलभोगेन वा विरोधिकर्मांतरेण वा ब्रह्मज्ञानेन वा वि
नाशः प्रारब्धस्य तु भोगेनैव नाशः किं बहुना प्रारब्धव्यतिरिक्तानामविद्यादीनां पंच
१८ क्लेशानां तत्त्वज्ञानान्नाशः ॥ तथा च अविद्यास्मितारागद्वेषाभिनिवेशाः पंच क्लेशाः ॥
कार्यकारणरूपा द्विविधाविद्या निरूपिता १ ॥ अहंकारस्य सूक्ष्मावस्थास्मिता
इदमेव महत्तत्त्वं सामान्याहंकार इति चोच्यते २ ॥ रागः उक्तः ३ ॥ द्वेषः क्रोधः ४ ॥ अस्वी

तत्त्वानुसंधा कृतस्य पुनस्तस्यार्थसहितस्तु तमभिनिवेशेन ॥ तेषां पंचीनां ब्रह्मसाक्षात्कारो निवृत्तिः ॥ ज्ञा
॥ ८ ॥ त्वादेवं मुच्यते सर्वपाशैरित्यादिश्रुतेः ॥ पात्रैः पंचत्वेऽशैरि स्पर्शः तिष्ठतु तावदप्रासं
गिकं ॥ एवं सूक्ष्मशरीरोत्पत्तिर्निरूपिता ॥ पंचीकृतभूतानि स्थूलभूतानि ॥ पंचीकरणं
तु पूर्वोक्तानामाकाशादीनां तामसांशानेकैकं द्विधा विभज्य ॥ तत्रैकं चतुर्धा वि
भज्य ॥ स्वांशं परित्यज्येतरांशेषु संयोजनं ॥ तासां त्रिवृतमेकैकं करवाणीति त्रिवृ त्रिवृत
त्व त्करणश्रुतेः ॥ पंचीकरणस्याप्युपलक्षणत्वात्पंचीकरणं प्रामाणिकमेव ॥ वैशे
ष्यादाधिक्यात्तद्वादस्तत्कथनं यथाहि पृथिव्यां जलादितुर्यांशमेलनेनैवखंड
चतुष्टयसहितार्धपृथिवी सैवोपदिश्यते ॥ एवमन्यत्र ॥ वैशेष्यात्तु तद्वाद इति ॥८॥
तद्वादस्त

ब्रह्मांडान्यनुज्ञातरूपेजाते ॥ ७४

न्यायेन स्वांशाभूयस्त्वाद्विशेषव्यपदेशोऽपि संभवति ॥ एवं च सत्याकाशे शब्दो
भिव्यज्यते ॥ वायौ शब्दस्पर्शौ ॥ तेजसि शब्दस्पर्शरूपाणि ॥ जले शब्दस्पर्शरू
परसाः ॥ पृथिव्यां शब्दस्पर्शरूपरसगंधाः ॥ तथा पंचीकृतपृथिव्याः ब्रह्मां चर
डमुत्पन्नं तदंतर्वर्तिनश्चतुर्दशब्रह्मांडांतर्वर्तिपृथिव्या ओषधय उ
त्पन्नाः ॥ ओषधीभ्योऽन्नं पितृभ्यां भुक्तान्नपरिणामरेतः शोणितद्वारा स्थू
लशरीरमुत्पन्नं ॥ तच्चतुर्विधं जरायुजमंडजं स्वेदजमुद्भिज्जं चेति ॥ मनुष्या
दिशरीरं जरायुजं पक्षिपन्नगादिशरीरमंडजं ॥ यूकादिशरीरं स्वेदजं च
गगुल्मादिशरीरमुद्भिज्जं ॥ तच्चैकस्थूलशरीरं पुनः प्रकारांतरेण द्वि

शरीरेषु

तत्वानुसंधा॰ विधंसमष्टिव्यष्टिभेदात् ॥ पंचीकृतपंचमहाभूततत्कार्यब्रह्मांडं तदंतर्वर्ति
॥९॥ कार्यंसर्वंसमष्टिरित्युच्यते ॥ अथवाव्यक्तिषुगोत्वादिवत्सर्वव्यष्टिष्वनुस्यू
तंपंचीकृतभूतकार्यब्रह्मांडात्मकंव्यापकंसमष्टिः ॥ वनवत्सकलस्थूल
शरीरसमुदायोवासमष्टिरित्युच्यते ॥ एतदुपहितंचैतन्यंविराड्वैश्वान
रइतिचोच्यते ॥ विविधंराजमानत्वात्सर्वनराभिमानित्वाच्च ॥ प्रत्येकंस्थू
मित्रं लशरीरंगवादिव्यक्तिवद्वावृत्तंव्यष्टिरित्युच्यते ॥ एतदुपहितंचैतन्यं
विश्वइत्युच्यते ॥ सूक्ष्मशरीरंपरित्यज्यस्थूलशरीरंप्रविष्टत्वात् ॥ अन
योःसमष्टिव्यष्ट्योःसामान्यविशेषयोरिवतादात्म्याभ्युपगमादेतदु ॥९॥

पहितयोःविश्ववैश्वानरयोरपितादात्म्यं ॥ एकएवजीवोजाग्रदवस्थायांस्थू
लसूक्ष्मकारणाविद्याभिमानीसन्विश्वइत्युच्यते ॥ सएवस्वप्नावस्थायांसू
क्ष्मशरीरकारणाविद्याभिमानीसन्तैजसइत्युच्यते ॥ सएवसुषुप्तौ
कारणाविद्याभिमानीसन्प्राज्ञइत्युच्यते ॥ सएवशरीरत्रयाभिमानर
हितंसन्शुद्धःपरमात्माभवति ॥ तस्यैवाभिमानिनोजीवस्यावस्थाःपं
चजाग्रत्स्वप्नसुषुप्तिमूर्छामरणभेदात् ॥ दिग्वाद्यधिष्ठितदेवतानुगृही
तैरिंद्रियैःशब्दादिविषयानुभवावस्थाजाग्रदवस्था ॥ जाग्रद्भोगप्रद
कर्मोपरमेसतींद्रियोपरमेजाग्रदनुभवजन्यसंस्कारोद्भूतविषय

तत्त्वानुस० ॥१०॥ तज्ज्ञानावस्थास्वप्नावस्था ॥ जाग्रत्स्वप्नभोगप्रदकर्मोपरमेण स्थूल
सूक्ष्मशरीराभिमाननिवृत्तिद्वारा विशेषविज्ञानोपरमात्मिका बुद्धेः
कारणात्मनावस्थितिः सुषुप्तिः ॥ मुद्गरप्रहारादिजनितविषादेन विशे
षविज्ञानोपरमावस्था मूर्छावस्था ॥ तदुक्तं ॥ मुग्धेर्द्धसंपत्तिःपरि
शेषादिति ॥ एतच्छरीरभोगप्रापककर्मोपरमेण द्विविधदेहाभिमान
निवृत्त्या संपिंडितकरणग्रामावस्थाभाविशरीरप्राप्तिपर्यंतं मरणा
वस्था ॥ केचित्तस्या उक्तावस्थास्वंतर्भावं वदंति ॥ अत्र श्रुतिस्मृतिप्र
माणानि प्रसिद्धानि ॥ एवमेव परमात्मा समष्टिस्थूलसूक्ष्मशरीरत ॥१०॥

१कए

त्कारणमायोपहितः सन्वैश्वानर इत्युच्यते ॥ अहमेव वैश्वानरोस्मीति
तदुपासनया तत्प्राप्तिफलं भवति ॥ वैश्वानराधिकरणे सूत्रकार भा
व ष्यकाराभ्यां श्रुत्यर्थस्य तथैव प्रतिपादनात् ॥ स एव परमात्मा ॥ समष्टि
सूक्ष्मशरीरतत्कारणमायोपहितः सन्हिरण्यगर्भ इत्युच्यते ॥ एतदु
पासनया तत्प्राप्तिफलं भवति ॥ अंतर उपपत्तेरित्यस्मिन्नधिकरणे सू ३५
त्रकारभाष्यकाराभ्यामुपकोशलविद्यायां तथैव प्रतिपादनात् ॥ च
स एव केवलमायोपाधिकः सन्नीश्वर इत्युच्यते ॥ तदुपासनया
तत्प्राप्तिफलं भवति ॥ सर्वत्र प्रसिद्धोपदेशादिति शांडिल्यविद्या ३

सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत॥ दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः॥१॥ सालोक्यं म-
यासहैकस्मिंल्लोके वासः। सार्ष्टिः समानैश्वर्यं। सामीप्यं निकटवर्तित्वं। सारूप्यं समानरूपता। एकत्वं सा-
युज्यं। उत अपि दीयमानमपि न गृह्णन्ति कुतस्तत्कामनेत्यर्थः॥३ गणेशपुराणे उत्तरखंडे एकोनपंचा

तत्त्वानुसंधा॰ यां दहरोत्तरेभ्य इति दहरविद्यायां च सूत्रकारभाष्यकराभ्यां यथोक्ते
॥११॥ श्वरोपासनया तत्प्राप्तिफलप्रतिपादनात्॥ तं यथा यथोपासते
तथैव भवतीति श्रुतेश्च॥ भावनामात्रहेतुत्वात् तस्मेन सार्ष्टिसारूप्य त
फ सामीप्यसालोक्यानि भवंति॥ सान्तःसायुज्यं सलोकता [illegible] मि
त्यादि श्रुतेः॥ ये पुनः साधनचतुष्टयसंपन्ना विचारोत्तमशमदम
द्यास्तेषां गुरुमुखाद्ब्रह्म निश्चित्य सर्वोपाधिविनिर्मुक्तं सच्चिदा
नंदलक्षणं ब्रह्माहमस्मीति निर्गुणब्रह्मोपासनयास्मिन्नेव शरी
रे जीवदवस्थायां मरणावस्थायां वा स्वर्गे लोके वा तु सत्त्वं ब्रह्म ॥११॥
शततमेध्याये॥ एवं पंचापि वा संप्राप्य देवास्तद्रूपतामियात्॥ सात्विको धीयुते देवराज सत्तुसरूपतां॥
उभाभ्यां चैव सानिध्यं तामसस्तु सलोकतां॥ आत्मयाजे जमानस्तु त्रेधा न क्रिनवेव यथा॥

साक्षात्कारेण तत्प्राप्तिं फलं भवति॥ श्रुतिन्यायसाम्यात्॥ ओमित्येतेनैवाक्षरेणप
रं पुरुषमभिध्यायीत स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते॥ ओमित्यात्मा त्परा
नं युंजीत॥ ॐमित्येवं ध्यायथ आत्मानमित्यादिश्रुतिभ्यः॥ भगवताप्युक्तं॥ ॐ
मित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्॥ यः प्रयाति त्यजन्देहं स याति परमां ग
५मिति तिं॥ अन्ये त्वेवमजानंतः श्रुत्वान्येभ्य उपासते॥ तेपि चातितरंत्येव मृत्युं श्रुति
तिच परायणाः॥ तावंतस्य दार्ष्टमायो पद्धितस्य ब्रह्मणः तटस्थलक्षणं जन्मा
दिकारणत्वं निरूपितं॥ अयमेवाध्यारोप इत्युच्यते॥ अस्यापवाद इदानीमु
च्यते॥ अप[illegible]वादो नाम ऽधिष्ठाने भ्रांत्या प्रतीतस्य तद्व्यतिरेकेणाभावर्नि

तत्वानुसं· श्चयः॥ यथा शुक्त्यादौ भ्रांत्या प्रतीतस्य रजतादेः शुक्तिव्यतिरेकेण नेदं रजतं किंतु शु
॥१२॥ क्तिरिति भावनिश्चयः॥ अयमेव बाधो विलापनमिति चोच्यते॥ स च बाधस्त्रिविधः॥
शास्त्रियो यौक्तिकं प्रत्यक्षश्चेति॥ अथात आदेशो नेति नेति ने [illegible] ति नेह नानास्ति कि
चने [illegible] त्यादि शास्त्राद् ब्रह्मव्यतिरेकेण प्रपंचाभावनिश्च [illegible]
यः शास्त्रीयबाधः॥ मृद्व्यतिरेकेण घटाभावनिश्चयवन्निखिलकारणीभूत
ब्रह्मव्यतिरेकेण निखिलप्रपंचाभावं निश्चित्य तद्द्वारा प्रमातुः स्वस्य मिथ्यात्वनिश्च
येन ब्रह्मात्ममात्रत्वनिश्चयो यौक्तिकबाधः॥ अहं ब्रह्मास्मीति तत्त्वमस्यादि वा
क्यजन्यसाक्षात्कारेण [illegible] ज्ञानतत्का ॥१२॥

र्यनिवृत्तिः प्रत्यक्षबाधः॥ यौक्तिकबाधस्यायं क्रमः स्थूलप्रपंचं सर्वमपि स्थूलभूते
षु विलाप्य तद्व्यतिरेकेण तन्नास्तीति निश्चित्य स्थूलभूतानि समष्टिव्यष्टि सू
क्ष्मशरीरं च सूक्ष्मभूतेषु विलाप्य तत्रापि पृथिवीमप्सु विलाप्यापस्तेजसि ते
जो वायौ वायुमाकाशे आकाशमज्ञाने अज्ञानं चिन्मात्रे विलापयेत्॥ तथा
च स्मृतिः॥ जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते॥ ज्योतिष्यापः प्रलीयंते ज्यो
तिर्वायौ प्रलीयते॥ वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते॥ अव्यक्तं पुरु
षे [illegible] निष्कले संप्रलीयत इति॥ उक्तं च॥ अकारं पुरुषं विश्वमुकारे प्रविला
पयेत्॥ उकारं तैजसं सूक्ष्मं मकारे प्रविलापयेत्॥ मकारं कारणं प्राज्ञं चि

तत्वानुसंधानं दात्मन्निविलापयेदिति ॥ आभ्यामध्यारोपापवादाभ्यां तत्त्वंपदार्थशोधनमपि
॥१३॥ सिद्धं भवति ॥ तथाहि मायादिसमष्टिस्तदुपहितं चैतन्यमेतदाधारानुपहि
तमखंडचैतन्यं च तत्रयः पिंडवदेतत्त्रयमविविक्तमेकत्वेनावभासमानं
तत्पदवाच्यार्थो भवति ॥ विविक्तमखंडचैतन्यं तत्पदलक्ष्यार्थो भवति ॥ अवि
द्यादिव्यष्टिस्तदुपहितं चैतन्यमेतदाधारानुपहितं प्रत्यक्चैतन्यमेतत्त्रयं त
प्तायःपिंडवदविविक्तमेकत्वेनावभासमानं त्वंपदवाच्यार्थो भवति
विविक्तं प्रत्यक्चैतन्यं त्वंपदलक्ष्यार्थो भवति ॥ एतौ लक्ष्यार्थावुपादाय संबं
धत्रयेणास्त्वहितं तत्त्वमस्यादिवाक्यं लक्षणयाखंडार्थबोधकं भवति ॥ संबंध ॥१३॥

त्रयं तु पदयोः सामानाधिकरण्यं ॥ सामानाधिकरण्यं नाम ॥ भिन्नप्रवृत्तिनिमि
त्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः ॥ यथा सोयं देवदत्त इत्यत्र तत्कालविशि
ष्टदेवदत्तवाचकस्तच्छब्दस्य एतत्कालविशिष्टदेवदत्तवाचकायंशब्द
स्य चैकस्मिन् देवदत्तपिंडे वृत्तिः सामानाधिकरण्यं ॥ पदार्थयोर्विशेषणवि
शेष्यभावः यथा तत्रैव सशब्दार्थतत्कालविशिष्टायं शब्दार्थैतत्काल
विशिष्टयोरन्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः ॥ सोयमयंस ष
इति ॥ पदयोरर्थयोर्वा विरुद्धवाच्यार्थेन सह लक्ष्यलक्षणभावः ॥ यथा
तत्रैव सोयमित्यादिवाक्ये वा सशब्दायंशब्दयोस्तदर्थयोर्वा विरुद्धदेव

रीश्वरजीवयोरन्योन्यभेदव्यावर्तक तथा तत्त्वमसीत्यंतदसीति विशेषणविशेष्यभावः॥ तथा त्वंपदयो स्तदर्थयोर्वा त॰१

१४

तत्त्वानुसंधाने दत्तपिंडेन वाक्यार्थेन सहलक्ष्यलक्षणभावः॥ तथा तत्त्वमस्यादिवाक्ये

॥२४॥ तत्त्वंपदयोः परोक्षत्वापरोक्षत्वविशिष्टेश्वरजीववाचकयोरखंडचैतन्ये

तात्पर्यवृत्तिः सामानाधिकरण्यं॥ तथा तत्त्वंपदार्थयोर्वाक्यार्थेनाविरु

द्धाखंडचैतन्येन विरुद्धांशपरित्यागेन लक्ष्यलक्षणभावः॥ तदुक्तं॥ सामा

नाधिकरण्यंच विशेषणविशेष्यता॥ लक्ष्यलक्षणभावश्च पदार्थप्रत्य

गात्मनामिति॥ अस्यार्थस्तु करवा॥ एतदभिप्रायेण वाक्यवृत्तावप्युक्तं ॥२५॥

तत्त्वमस्यादिवाक्यं च तादात्म्यप्रतिपादने॥ लक्ष्यौ तत्त्वंपदार्थौ द्वावुपादा

यप्र[illegible] वर्तत इति॥ तादात्म्यप्रतिपादनेऽखंडस्वरूपप्रतिपादन इत्यर्थः ॥२६॥

२ विभिन्ना जातिर्विजातिर्विजातौ भवः विजातीयः
समाना जातिः सजातिः सजातौ भवः सजातीयः

संसर्गस्य वा [illegible] विशिष्टस्य वा विशिष्टैकस्य वा प्रत्यक्षादिविरुद्धत्वेन तत्त्व

मस्यादिवाक्ये प्रतिपाद्यत्वायोगात्॥ अखंडत्वं नाम विजातीयसजातीयस्वग

तभेदशून्यत्वं सर्वस्य प्रपंचस्य ब्रह्मव्यतिरिक्तस्य कल्पितत्वेन मिथ्यात्वाद्विजा

तीयभेदशून्यता जीवपरमात्मनोरत्यंतैक्यात्सजातीयभेदशून्यता॥ एकर

सत्वात्स्वगतभेदशून्यता॥ अथवा त्रिविधपरिच्छेदशून्यत्वमखंडत्वं॥ विभु

त्वाद्देशपरिच्छेदशून्यत्वं नित्यत्वात्कालपरिच्छेदशून्यत्वं॥ सर्वात्मकत्वाद्वस्तु

परिच्छेदशून्यत्वं॥ वेदाहमेतमजरं पुराणं सर्वात्मानं सर्वगतं विभुत्वादित्या

दिश्रुतेः॥ यद्वा॥ अपर्यायानेकशब्दप्रकाश्यत्वे सत्यविशिष्टत्वमखंडत्वं॥

१ अनेकार्थाः

२६ति

तत्त्वानुसंधा तदुक्तं ॥ अविच्छिन्नसमपर्यायानेकशब्दप्रकाशितं ॥ एकं वेदांतनिष्णाता अखं
॥१५॥ डं प्रतिपेदिरे ॥ एवं तत्त्वमस्यादिवाक्यजन्याखंडापरोक्षज्ञानादज्ञाननिवृ
निवृत्तिरानंदावाप्तिश्च ॥ तदुक्तं ॥ प्रत्यग्बोधो य आभाति सोऽद्वयानंदलक्षणः
अद्वयानंदरूपश्च प्रत्यग्बोधैकलक्षणः ॥ इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्य
दा भवेत् ॥ अब्रह्मत्वं त्वमर्थस्य व्यावर्तेत तदैव हि ॥ तदर्थस्य च पारोक्ष्यं यद्येवं
किं ततः शृणु ॥ पूर्णानंदैकरूपेण प्रत्यग्बोधोऽवतिष्ठत इति ॥ अन्योन्यतादात्म्यप्र
तिपत्तिः ॥ अहं ब्रह्मास्मि ब्रह्मैवाहमस्मीत्यखंडाकारवृत्तिः ॥ तया वृत्त्या ज्ञाने
निवृत्ते ब्रह्मत्वपरोक्षत्वादीनां निवृत्तत्वात् सर्वसाम्याखंडानंदस्वरूपा ॥१५॥

२ उपादानेन सह समसत्ताकस्येति

१ वृत्तिर्वृत्तिज्ञाने

वस्थितिर्भवतीति श्लोकतात्पर्यार्थः ॥२॥ वृत्तिर्नाम विषयचैतन्याभिव्यंजको
तः करणाज्ञानयोः परिणामविशेषः अभिव्यंजकत्वं नाम अपरोक्षव्यवहा
रजनकत्वम् आवरणनिवर्तकत्वं वा ॥ परिणामो नामोपादानसमसत्ताका
न्यथाभावः उपादानविषमसत्ताकान्यथाभावो विवर्तः ॥ इति भेदादनयोः
परिणामविवर्तयोर्वृत्तिरुपादानांतःकरणाज्ञानापेक्षया परिणामश्चै
तन्यापेक्षया विवर्त इति न सिद्धांतविरोधः ॥ तन्मनोऽकुरुतेत्यादिश्रुतेः अंतः
स्प करणकार्यद्रव्यत्वेन सावयवतया परिणामित्वोपपत्तिः ॥ सा च वृत्तिर्द्विविधा
प्रमाप्रमाभेदात् ॥ तत्र बोधेद्धा वृत्तिर्वृत्तीद्धबोधो वा प्रमा ॥ सा च द्विविधा

१ यथार्थज्ञानं प्रमा ॥ यथायं घट एव ॥ १ बोधेन इद्धा ज्वालिता प्रकाशिता सा तथा ॥ वृत्त्याविद्धः प्रतिबिं
अयथार्थज्ञानम् अप्रमा ॥ यथा शुक्तौ रजतं ॥ बिंबो वृत्तीद्धः स चासौ बोधश्चेति तथा ॥ वृत्तिस्थितिबिंबश्चै
तन्यमिति यावत् ॥

तत्त्वानुसंधानं ईश्वराश्रयाजीवाश्रयाचेतितत्रेश्वराश्रयपरपर्यायस्रष्टव्यविषयाकारमाया
॥१९॥ वृत्तिप्रतिबिंबितचिदीश्वराश्रया॥ तदेक्षतबहुस्यांप्रजायेयेत्यादिश्रुतेः॥
[illegible]
[illegible]
[illegible]॥अनधिगताबाधितविषयाका वि
रांतःकरणवृत्तिप्रतिबिंबितचिद्वितीयाप्रमात्सैकप्रमायास्तथात्वंन्नास्
भवः प्रपंचस्यसंसारदशायामबाधितत्वात्तत्प्रमायांनाव्याप्तिः॥ शुक्तिर
जतादेर्ज्ञातसत्ताकत्वेनज्ञातसत्ताकत्वाभावान्नातिव्याप्तिः॥ तत्करणं ॥१९॥

प्रमाणं॥ साजीवाश्रयाप्रमाद्विविधा॥पारमार्थिकीव्यावहारिकीचेति॥ तत्र त
त्त्वमस्यादिवाक्यजन्याप्रमा [illegible] पारमार्थिकी॥ साचनिरूपिताग्रेनिरूप
यिष्यते॥ प्रपंचप्रमाव्यावहारिकी॥ साषड्विधाप्रत्यक्षानुमित्युपमितिशा
ब्दार्थापत्त्यभावप्रमाभेदात्॥ तत्रविषयचैतन्याभिन्नप्रमाणचैतन्यंप्रत्यक्षंप्रमा॥ प्र
[illegible]त्यक्षादिकमेवचैतन्यमुपाधिभेदाच्चतुर्विधं॥ प्रमातृचैतन्यं॥ प्रमाणचैतन्यं
विषयचैतन्यं॥ फलचैतन्यंचेति॥ तत्रांतःकरणविशिष्टचैतन्यंप्रमातृचै
तन्यं॥ अंतःकरणवृत्त्यवच्छिन्नचैतन्यंप्रमाणचैतन्यं॥ घटाद्यवच्छिन्नचै
तन्यंविषयचैतन्यं॥ अंतःकरणवृत्त्यभिव्यक्तचैतन्यं[illegible]फलचैतन्यं॥

तत्त्वानुसंधा ॥१९॥ १

तत्र वृत्तिविषययोर्युगपदेकदेशावस्थानेन तदुपहितचैतन्ययोरप्यभेदो भवति
तथा हि तटाकोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारं प्रविश्य चतुःकोणाद्याका
रेणाय परिणमते ॥ तथेंद्रियार्थसन्निकर्षानंतरमंतःकरणं चक्षुरादिद्वा
रा विषयदेशं गत्वा तेन संयुज्यते ॥ पश्चात्तदाकारेण परिणमते सोयं परिणा
मो वृत्तिः ॥ तस्यां वृत्तौ विषयचैतन्यं प्रतिफलति ॥ तदा वृत्तिविषययोर्युगपदे
कदेशस्थत्वेन तदुपहितभेदाप्रयोजकत्वात् ॥ प्रमाणचैतन्यं विषयचैत
न्याभिन्नं भवति सेयं प्रत्यक्षप्रमा ॥ तत्र वृत्त्यावरणं निवर्तते ॥ चैतन्येनाज्ञा
नं भ्रमयावा सावरणमज्ञानं निवर्तते ॥ ततो विषयः स्फुरति साक्षिणोऽं ॥२७॥

तःकरणोपहितं चैतन्यं साक्षी ॥ सेयं प्रत्यक्षप्रमा द्विविधा बाह्यांतरप्रमा चे प्रमा १
ति ॥ तत्र बाह्यप्रमा शब्दस्पर्शरूपरसगंधभेदात्पंचविधा ॥ तत्करणानि
श्रोत्रादीनि ज्ञानेंद्रियाणि पंच ॥ अंतरप्रमा द्विविधात्मगोचरा सुखादि आ२
गोचरा चेति ॥ आत्मगोचरा द्विविधा विशिष्टात्मविषया शुद्धात्मविषया चे
ति ॥ अहं जीव इत्यादि विशिष्टात्मविषया ॥ अहं ब्रह्मास्मीति शुद्धात्मवि
षया ॥ मयि सुखमस्त्यादि सुखादिविषया ॥ अंतरिंद्रियं मनः ॥ आंतरप्र
माकरणमिति वाचस्पतिमिश्राः ॥ आचार्यास्त्वेवं वर्णयंति ॥ इंद्रियेभ्यः प
रा ह्यर्था अर्थेभ्यश्च परं मनः ॥ इंद्रियेभ्यः परं मन इति श्रुतिस्मृतिभ्यां मनस इं

तस्यानुसंधाने न्द्रियेभ्यः पृथक्करणान्मूर्तेंद्रियं ॥ वृत्तिप्रस्फपादानत्वाच्चेन करणं मनः ॥ सुखा
॥२८॥ दिसाक्षात्कारस्य प्रमाणाजन्यत्वेनाप्रमात्वमिष्टमेव ॥ अतएवांतःकरण
तधर्मत्वं श्रुतिरजतादिवत्स्यातीति कल्व ॥ शुधात्मसाक्षात्कारस्य वेदांतवाक्य
जन्यत्वात्प्रमात्वं ॥ वाक्यस्याप्यपरोक्षज्ञानजनकत्वं वक्ष्यते ॥ लिंगज्ञानज
न्यज्ञानमनुमितिः ॥ व्याप्त्याश्रयो लिंगं ॥ साधनसाध्ययोर्नियतसामानाधि
करण्यं व्याप्तिः प्रतिबंधकाभावे सति सहचारदर्शनेन सा गृह्यते ॥ यस्यां
गृहीतायां लिंगज्ञानेन व्याप्त्यनुभवजन्यसंस्कारो बोधेम[illegible]त्यनुमिति
र्जायते ॥ इयं स्वार्थानुमितिः ॥ परार्थानुमितिस्तु न्यायसाध्या ॥ न्यायो नय ॥२८॥

तथाचार्यं

वयसमुदायः ॥ अवयवास्त्रयः ॥ प्रतिज्ञाहेतूदाहरणरूपाः ॥ उदाहरणोपन
तस्मान्नधेति यनिगमनरूपा [illegible]वा ॥ तथाहि जीवः परस्मान्न भिद्यते सच्चिदानंदलक्ष
णत्वात् परमात्मवदित्यत्र जीवः परस्मान्न भिद्यत इति प्रतिज्ञा ॥ सच्चिदा
नंदलक्षणत्वे तु इदमेव लिंगमित्युच्यते ॥ यः सच्चिदानंदलक्षणः स
परस्मान्न भिद्यते यथा परमात्मेत्युदाहरणं ॥ अहमस्मि भवामि[illegible]
कदाप्यप्रियो न भवामीत्यनुभवाज्जीवस्य सच्चिदानंदलक्षणत्वं ॥ अ
तो न हेत्वसिद्धिः ॥ सत्यं ज्ञानमनंतं ब्रह्मानंदो ब्रह्मेति श्रुत्यादिस्या आ
दिश्रुत्या ब्रह्मणः सच्चिदानंदलक्षणत्वं ॥ अतो न दृष्टांतासिद्धिः ॥ ए

तत्त्वानुसंधान-
॥१९॥

वं गुरुमुखाच्छ्रुतवेदांतस्य शोधितस्य त्वंपदार्थस्य स्वस्मिन्नेवं साक्षिदानं
दलक्षणादर्शनादहं ब्रह्मेति ॥ ब्रह्मणोऽभिन्नानुमितिः कस्य घटते ॥ न चोपनिष
दस्य ब्रह्मणस्यानुमानगम्यत्वानुपपत्तिः ॥ मंतव्य इति मननविधानाद्वेदां
तसहकारित्वेनानुमानप्रामाण्यस्वीकारात् ॥ सा परानुमितिस्तु न्यायप
देशेनोपपद्यते ॥ न्यायो दर्शितः ॥ एवं ब्रह्मव्यतिरिक्तस्य प्रपंचस्य मिथ्या
त्वसाध्यानुमिति ॥ ईश्वरत्वादिहेतुभिः संपद्यते ॥ मिथ्यात्वं नाम अनिर्वचना
यत्वं दृश्यत्वं नाम चैतन्यविषयत्वं ॥ अतो न ब्रह्मणि व्यभिचारः ॥ तत्रा
नुमानमन्वयीरूपमेकमेव न तु केवलान्वयि ॥ अस्मिन्मते ब्रह्मव्यति ॥१९॥

अभावनिरूपकत्वेन

रिक्तस्य सर्वस्यात्यंताभावप्रतियोगित्वेन तदप्रतियोगित्वरूपकेवलान्वयि
त्वाप्रसिद्धेः ॥ नापि व्यतिरेकि ॥ साधनेन साध्यानुमितौ साध्याभावव्याप्ति साधनाभाव
ज्ञानस्यानुपयोगात् ॥ अन्वयव्याप्तिमिति दुः साध्यप्रमार्थापत्तिप्रमाणादि व
यथा गोसदृशो गवयः ॥४ ति वक्ष्यते ॥ सादृश्यप्रमितिरुपमितिः ॥ वाक्यकरणिका मोक्षेच्छादौ आ
कांक्षायोग्यतासंनिधिमत्पदसमुदायो वाक्यं ॥ अन्वयानुपपत्तिराकांक्षा
वाक्यार्थाबाधो योग्यता ॥ अविलंबोच्चारणं संनिधिः ॥ अव्युत्पन्नस्य संग
तिग्रहाभावान्न वाक्यार्थप्रमा ॥ पदपदार्थयोः स्मार्यस्मारकभावः संग
च ति: ॥ सा द्विविधा शक्तिर्लक्षणा चेति ॥ शक्तिर्नाम मुख्यावृत्तिः ॥ पदपदार्थ

तत्वानुसंधानं ||२०||

र्थोर्वाच्यवाचकभावसंबंधइतियावत् || साचत्रिविधा योगोरूढिश्चेति || अव
यवशक्तिर्योगः यथा याचकादिपदानां रूढिः समुदायशक्तिः || यथाघटा
दिपदानां सेचव्यवहारादिनागृह्यते || तथाहि उत्तमवृद्धस्यघटमानयेति ३३
२ वाक्यश्रवणानंतरंमध्यमवृद्धः प्रवर्त्तते || बालःप्रवृत्तिहेतुज्ञानमनुमिनो
||१०|| २ ति || तथाहि इयंप्रवृत्तिर्ज्ञानसाध्याप्रवृत्तित्वान्मदीयप्रवृत्तिवदितिज्ञान
मनुमायतस्यवाक्यजन्यत्वमनुमिनोति || इदंज्ञानमेतद्वाक्यजन्यमे
तद्वाक्यान्वयव्यतिरेकानुविधायित्वात् || दंडजन्ये घटादिवत् तदनंतरं ३
सामान्यविशेषाभ्यांवाधोद्वापघटपदस्यघटव्यक्तौशक्तिमव ||२०||

मा१ पा२

घनंनय गामानय१

वक्त्रुव्यापकंसामान्यं ||व्याप्यव्यापकंविशेषः ||घ घाघटमानय || गामानय ||घट मानयइति घटा दीनांसामान्यत्वा आनयस्यविशेषत्वं ||१

१ यथागोपदस्यगोत्वविशिष्टव्यक्तावेवशक्तिः ||१
२ यथागोपदस्यगामानयइत्यस्मिन्नर्थेशक्तिः ||२

धातुप्रकृतिप्रत्ययादीनांशक्तिग्रहोव्याकरणाद्भवति || यथा गोसदृशोगवयः || गुणेशुक्लादयः पुंसिगुणिलिंगास्तुत द्वतीतिकोशः || यथाकोकिलः पिकपदवाच्य इत्यादिशब्दात् पि काटिशब्दे शक्ति ग्रहः ||५ व्यव हारतः || यथा घवमयशब्दरू

धारयतिसेचशक्तिंपदार्थइतिनैयायिकाः || कार्यान्विते इतिमीमांसकाः ||
२ सिद्धार्थे २ अन्विते इतिवेदांतिनः || एवंव्याकरणादिनापिशक्तिर्गृह्यते || उक्तंच || शक्ति
ग्रहंव्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च || वाक्यस्यशेषाद्विवृते त
र्वदंतिसान्निध्यतःसिद्धपदस्यवृद्धाइति || लक्षणाशक्यसंबंधः साचत्रिवि वाच्यार्थः ३
विधा केवललक्षणालक्षितलक्षणाचेति || केवलाचत्रिविधा जहल्लक्षणा ३ जहल्लक्षणा
जहदजहल्लक्षणाचेति || वाक्यार्थपरित्यागेनतत्संबंधपर्यांतरेवृत्तिर्जहल्लक्षणा यथा नवतीत्यत्र
गोपग्रामः गंगायांघोषः || प्रतिवसतीत्यत्रगंगापदस्यतीरेवाच्यार्थपरित्यागेन पदस्यदीर्घ
तत्संबंधपर्यांतरेवृत्तिर्जहल्लक्षणा यथा मंचाःक्रोशंतीत्यत्रमंचपदस्य २ कालेशेषेआप्ताणां प्रयोगः || वि वरणंतुतत्समा नार्थकपदांतर

रेणतदर्थकत्वं || यथाघटोस्तीत्यस्यकलशोस्तीत्यनेनविवरणेनघ टपदस्यकलशेशक्तिग्रहः || यथाइहसहकारतरौमधुरंपिकोरौतिइ त्यादौपिकपदस्यशक्तिग्रहः ||७

रेफद्वयश्रवणस्यान्तिमपरपदघटितपरपरासंबंधेन ४ — नामान्तरो नीति नामरः

ज

तत्त्वानुसंधानं — सं च स्यपुरुषे ज्ञातै[illegible]कदेशपरित्यागेनैकदेशो वृत्तिर्जहदजहल्लक्षणेय ६
॥२१॥ — मैवं भागलक्षणेत्युच्यते ॥ यथा सोयं देवदत्त इत्यत्र सोयमितिपदयोः केव
लदेवदत्तपिंडे ॥ यथा वा तत्त्वमसीत्यत्र तत्त्वंपदयोरखंडचैतन्ये वाक्यपरं
परासंबंधो लक्षितलक्षणा ॥ यथा द्विरेफपदस्य मधुकरे ॥ गोणपि लक्षि
तलक्षणैव ॥ एवं व्युत्पन्नस्य रहितसंगतिकवाक्यार्थप्रमोत्पत्तौ वाक्यां — क्याद्ध
क्षा योग्यतासत्तिस्तात्पर्यज्ञानं चेति चत्वारि कारणानि ॥ आकांक्षा यो
ग्यते निरूपिते ॥ शक्तिलक्षणान्यतरसंबंधेनाव्यवधानेन पदजन्यपदा
र्थोपस्थितिरासत्तिः तात्पर्यं द्विविधं वक्तृतात्पर्यं ग्रंथतात्पर्यं चेति ॥ पुरु ॥२१॥

सिंहे वर्तविपर्यय इतिहीनसीतिसिंहः।

॥ सिंहो माणवकेऽसन् सिंहशब्दवाच्यसंबंधिक्रौर्यादिसंबंधेन माणवकस्य प्रतीतिः ॥५

यथार्थज्ञानशून्येन पुरुषेण उच्चारिताद्वेदाद्व्युत्पन्नस्यार्थप्रत्ययाभावप्रसंगात् ॥ न चेश्वरीयतात्पर्य
ज्ञानात्तत्र शाब्दबोध इति वाच्यं ॥ ईश्वरानंगीकर्तुरपि नव्यकार्थप्रतिपत्तिदर्शनात् ॥

त ति

षाभिप्रायो वक्तृतात्पर्यं ॥ तज्ज्ञानं वाक्यार्थज्ञाने न कारणं ॥ तदभावेपि शु[illegible]त्यव
वाक्याद्वाक्यार्थज्ञानदर्शनात् ॥ तदितरप्रतीतीमात्रेच्छयानुच्चरितत्वमतत्त
दर्थप्रतीतीति ॥ जननयोग्यत्वं ग्रंथतात्पर्यं ॥ तच्च षड्विधैर्लिंगैर्निर्णीयते ॥ वेदे
लिंगानि तु दर्शितानि ॥ उपक्रमोपसंहाराभ्यासोपूर्वताफलं अर्थवादोप
पत्तीचलिंगं तात्पर्यनिर्णये इति ॥ अस्यार्थः ॥ प्रकरणप्रतिपाद्यस्याद्वितीयव
स्तुन आद्यंतयोः प्रतिपादनमुपक्रमोपसंहारौ ॥ यथा छांदोग्यषष्ठे सदे — प्रपाठके
व सोम्येदमग्र आसीदेकमेवाद्वितीयं ॥ ऐतदात्म्यमिदं सर्वमित्यु[illegible]पक्रमो
पसंहारावाद्यंतयोः ॥ [illegible] ॥ प्रकरणप्रतिपाद्यस्य पु

तत्त्वानुसंधा नः पुनः प्रतिपादनमभ्यासः ॥ यथा तत्रैव तत्त्वमसीति नवकृत्वोऽभ्यासः ॥ प्रक नवकारानिति
॥२२॥ रणप्रतिपाद्यस्य मानांतराविषयतापूर्वता ॥ यथा तत्रैवाद्वितीयवस्तुनो मा नवकृत्वः ९
नांतराविषयता ॥ प्रकरणप्रतिपाद्यस्य श्रूयमाणं तज्ज्ञानात्मयोजनं फलं ॥
यथा तत्रैवाचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्षे अथ संपत्स्ये
तेऽद्वितीयवस्तुज्ञानात्तत्प्राप्तिः फलं ॥ प्रकरणप्रतिपाद्यस्य प्रशंसन
मर्थवादः ॥ यथा तत्रैव येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञा
तमित्यद्वितीयवस्तुप्रशंसनं ॥ प्रकरणप्रतिपाद्यस्य दृष्टांतैः प्रतिपादन
मुपपत्तिः ॥ यथा तत्रैव यथा सोम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्याद् ॥२२॥

१ वाचारंभनाममात्रं विकारो न वस्तुनोऽस्तीति ॥ सकारणज्ञानाद्विकारज्ञानं युक्तमित्यर्थः ॥

वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादिवाक्यप्रतिपादि
तं मृदादिदृष्टांतैरद्वितीयवस्तुप्रतिपादनं ॥ एवंषड्विधतात्पर्यलिंगैर्वे
ना दांतानामद्वितीये ब्रह्मणि तात्पर्यनिश्चयः ॥ इदमेव श्रवणमित्युच्यते ॥ श्रुत
स्यार्थस्योपपत्तिभिश्चिंतनं मननं ॥ विजातीयप्रत्ययतिरस्कारेण स
जातीयप्रत्ययप्रवाहीकरणं निदिध्यासनं ॥ तदुक्तं ॥ शाब्दात्किंविध
यन्निरूपणं युक्तितः श्रवणमुच्यते बुधैः ॥ वस्तुतत्त्वविषयं निरूपणं
युक्तितो मननमित्युदीर्यते ॥ चेतसस्तु चितिमात्रगोचरता ध्यानमित्य
भिवदंति वैदिकाः ॥ अंतरंगमिदमित्यमीरितं तत्र कुरुष्व परमात्मबुद्ध

तस्मादात्मा वा अरे द्रष्टव्यो दर्शनविषयमापादयितव्यः॥ श्रोतव्यः पूर्वमाचार्यत आगम
तश्च॥ पश्चान्मंतव्यस्तर्कतः॥ ततो निदिध्यासितव्यो निश्चयेन ध्यातव्यः॥ एवं ह्यसौ दृष्टो भवति २

इति
तत्वानुसंधा-
॥२३॥ श्री

यैः॥ इतीदं श्रवणादित्रयं साधनसंपन्नस्य संन्यासिनो ज्ञाने प्रसंतरंगसा
धनं॥ आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इत्यादिश्रुतेः॥ सा
धनानि तु॥ नित्यानित्यवस्तुविवेकः॥ इहामुत्रार्थभोगफलविरागः॥ शम
दमादिसंपन्मुमुक्षुत्वं चेत्येवंरूपाणि॥ परीक्ष्य लोकान्कर्मचितान्ब्रा
ह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन तद्विज्ञानार्थं स गुरुमेवाभि
गच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं॥ कश्चिद्धीरः प्रत्यगात्मानमै
क्षदावृत्तचक्षुरमृतत्वमिच्छन्॥ शांतो दांत उपरतस्तितिक्षुः स
माहितो भूत्वात्मन्येवात्मानं पश्यतीत्यादिश्रुतिभ्यः॥ यथोक्तसाधनसं ॥२३॥

शांतो बाह्येंद्रियव्यापारउपशांतः॥ दांतो ऽन्तःकरणनिग्रहवानिति यावत्॥ उपरतः सर्वैषणाविनिर्मुक्तः संन्यासी॥
तितिक्षुर्द्वंद्वसहिष्णुः॥ समाहितः इंद्रियांतःकरणचलनरूपात्स्वव्यापारात्स्वैकाग्र्यरूपेण समाहितो भूत्वा॥ आत्म
न्येव स्वकार्यकरणसंघाते आत्मानं प्रत्यक्चेतयितारं पश्यति॥ २

च३

पन्नस्य संन्यासाधिकारः॥ विहितानां कर्मणां विधिना परित्यागः संन्यासः॥
स च वैराग्यहेतुकः॥ यदहरेव विरजेत्तदहरेव प्रव्रजेदित्यादिश्रुतेः॥ वैराग्यं दि
परमेतस्य मोक्षस्य परमोवधिरिति स्मृतेश्च॥ स वैराग्यतारतम्येन च चतुर्वि
धः॥ कुटीचकबहूदकहंसपरमहंसभेदात्॥ वैराग्यं द्विविधं॥ अपरं परं चे
ति॥ तत्रापरं चतुर्विधं यतमानव्यतिरेकैकेंद्रियवशीकारभेदात्॥ अ
स्मिन्संसार इदं सारमिदमसारमिति सारासारविवेको यतमानवैरा
ग्यं॥ चित्तगतदोषाणां मध्ये एतावंतः पक्वा एतावंतोऽपक्वा इति विविच्यापक्व
दोषनिरोधयत्नो व्यतिरेकवैराग्यं॥ विषयेष्वासक्तेऽपि मनसींद्रियाणि

ईनुमिक्षाजिहासासन्नुमिक्षेतियावत् २

तत्वानुसंधानं ॥२४॥ रोधावस्थानमेकेंद्रियत्वं वैराग्यं वशीकारवैराग्यं ऐहिकामुष्मिकवि
षयजिहासा तदुक्तं दृष्टानुश्रविकविषयावितृष्णस्य वशीकारसंज्ञं
वैराग्यमिति तच्चत्रिविधं मंदं तीव्रं तीव्रतरं चेति पुत्रदारादिवियोगे धिक्सं
सारइति बुध्याविषयजिहासा मंदवैराग्यं अस्मिन् जन्मनि पुत्रदारादि
मास्त्विति स्थिरबुध्या विषयजिहासा तीव्रं पुनरावृत्तिसहितब्रह्मलो
कादिपर्यंतमास्त्विति स्थिरबुध्या विषयजिहासा तीव्रतरं तत्र मंद
वैराग्ये संन्यासाधिकार एव नास्ति यदहमन् एव वैराग्यं जायते सर्वव
स्तुषु तदेव संन्यसेद्विद्वानन्यथा पतितो भवेदिति स्मरणात् तीव्रवै ॥२४॥

...पकः ॥ निर्णयसिंधौ ॥ ॥संन्यासश्चतुर्धेस्यात् हारीतः ॥ कुटीचको बहूदको हंसश्चैव तृतीयकः ॥ चतुर्थः परमो हंसो योयः पश्चात्स उत्तमः ॥१॥ आद्यः पुत्रादिना कुटीं
कारयित्वा तत्र गृहे वा सेवेत् काषायवासाः शिखोपवीती त्रिदंडवान् बंधुषु स्वगृहे वान्नं जानन् आत्मानं भवेत् एतद् संनाशकरूपं परं ॥ द्वितीयस्तु ॥ बंधून् हित्वा स्वग्रामं
त्यक्त्वा भैक्षं चरन् एवमोक्षवेषः स्यात् ॥ हंसस्तु ॥ एवंरूपो वेषोप्येकदंडः ॥ कुटीचको एकं तु वैणवं दंडं धारयेन्नित्यमादरादिति स्कांदात् ॥ विष्णुरपि ॥ यज्ञोपवीतं
दंडं च वस्त्रं जंतुनिवारणं ॥ तावान्परिग्रहः प्रोक्तो नान्यो हंसः परिग्रह ... ॥ चतुर्थोपि स्कांदे ॥ परमहंसस्त्रिदंडं च रज्जुं गोवालनिर्मितं ॥ शिक्यं च

[illegible]

राग्ये सति यात्राद्यशक्तो कुटीचकः बहूदकसंन्यासाधिकारः ती
व्रवैराग्ये सति हंससंन्यासाधिकारः एते त्रयः संन्यासाः एते धर्माचाराः स्म
र्तोप्रसिद्धाः तीव्रतरवैराग्ये सति मुमुक्षोः परमहंससंन्यासाधिकारः सच पर
महंसो द्विविधः विविदिषासंन्यासश्चेति साधनसंपन्नेन तत्वज्ञानमु
द्दिश्य क्रियमाणः संन्यासो विविदिषासंन्यासः एतमेव प्रव्राजिनो लो
कमिच्छंतः प्रव्रजंतीत्यादिश्रुति स्तत्र प्रमाणं सच द्विविधः जन्मापाद
ककर्मत्यागात्मकः प्रैषोच्चारणपूर्वकं दंडधारणाद्याश्रमरूपश्चेति
न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरित्यादिश्रुति

सोविद्वत्संन्या५

[illegible]

[illegible]

तत्वानुसंधानं रा द्वेषप्रमाणां विरक्तस्य गृहस्थादेः प्रबलनिमित्तवशेन संन्यासप्रतिबंधे
||२५|| आश्रमसंन्यासेधिकारः। अत एव स्त्रीणामप्यधिकारः। जनकादीनां मैत्रेयी
प्रभृतीनां तत्त्वविदां श्रुतिस्मृतीतिहासपुराणेषूपलंभात्। द्वितीये तु
दंडमाच्छादनं कौपीनं परिग्रहेच्छेषं विसृजेत्। संसारमेव निःसारं दृष्ट्वा
दृष्टुमिच्छा सारदिदृक्षया। प्रव्रजंत्यकृतोद्वाहाः परं वैराग्यमाश्रिता इत्यादिवच
नानि प्रमाणानि। गृहस्थाश्रमादौ कृतश्रवणादिभिरुत्पन्नब्रह्मसा
क्षात्कारेण गृहस्थादिना चित्तविश्रांतिलक्षणजीवन्मुक्तिमुद्दिश्य
क्रियमाणः संन्यासो विद्वत्संन्यासः। तत्रैतमेव विदित्वा मुनिर्भवति ||२५||

२

अथ योगिनां परमहंसानामित्यादि परमहंसोपनिषत्। यदा तु विदितं तत्
त्वं परं ब्रह्म सनातनं तदैकदंडं संगृह्य सोपवीतां शिखां त्यजेदित्यादिश्रु दि
तिस्मृतिवचनानि प्रमाणानि। तत्राद्यसंन्यासो जन्मांतरेपि ज्ञानमुप
करोति। जनकादीनां तत्त्वविदां तत्त्वज्ञानोपलंभाच्छ्रुत्यादिषु। यथा तु
दि संन्यासमनसा वाचा वा संन्यसेत्यातुरसंन्यासविधानाच्च। आतुरे
वि पि रक्तस्यैवाधिकारान्न संन्यासांतरं। अन्यथा प्रकरणविरोधप्रसंगा
त्। तदुक्तं। जन्मांतरेषु यदि साधनजातमासीत्संन्यासपूर्वकमिदं श्र
वणादिकं च। विद्यामवाप्स्यति जनः सकलोपि यत्र तत्राश्रमेष्वपि व

न्या२

तत्त्वानुसंधा० सन्नं निचारयामशंति ॥ तदेवं पूर्वोक्ताधिकारिणः श्रवणादीनां तत्वज्ञान
॥२९॥ कारणत्वमन्वयव्यतिरेकाभ्यां निश्चीयते ॥ अ[illegible]हर्यश्रोतव्य इत्यादि
तव्यप्रत्यय इति वाचस्पतिमिश्राः ॥ आचार्यास्तु एवं वर्णयंति ॥ यथोक्ता
धिकारिणो द्रष्टव्यः श्रोतव्य इत्यादिवाक्यैर्दर्शनमुद्दिश्य मननिदिध्या
५सद सनाभ्यां फलोपकार्यंगाभ्यां श्रवणं नामांगी विधीयते ॥ तस्य च दृष्टफ
लत्वान्नापूर्वविधिः ॥ अप्राप्तार्थविधायको ह्यपूर्वविधिः ॥ किंतु नियम
विधिर्वा परिसंख्याविधिर्वा पक्षप्राप्तस्याप्राप्तांशपूरको विधिर्नियम
विधिः ॥ यथा [illegible] व्रीहीनवहन्यादित्यवघातविधिः ॥ [illegible] ॥२९॥
यथाव्रीहीन्प्रोक्षतीति

[illegible] पंच पंचनखा भक्ष्याः ॥ पंचनखानामशशकः शल्लकी गो
धाखड्गः कूर्मश्च पंचकः ॥ उभयप्राप्तावितरव्यावृत्तिबोधको विधिः परि
संख्याविधिः ॥ यथा [illegible] धमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त श्वेश्वस
६ इति गर्दभरशनाया ग्रहणव्यावृत्तिविधिः ॥ एवं प्रकृतेपि जिज्ञासुर्वेदांत
श्रवणमेव कुर्यादिति नियमविधिः ॥ वेदांतश्रवणव्यतिरिक्तं न कुर्या
दिति परिसंख्याविधिर्वा ॥ तदुक्तं ॥ नियमः परिसंख्या वा विध्यर्थोऽपि भ
वेद्यतः ॥ अनात्मादर्शिनेनैव परात्मानमुपास्महे इति ॥ तच्च श्रवणं
संन्यासिनां नित्यं ॥ नित्यं कर्मपरि [illegible] सज्य

कदापि

द[illegible]न्नावसरं किंचित्कामादीनां मैनागपि॥२

वेदांतश्रवणं विना वर्तमानस्य संन्यासी पतत्येव न संशय इत्यैकरणं श्र वण
स्यवाप्यश्रवणात् आस्फोतेरामतेः कालं नयेद्वेदांतचिंतयेति स्मृत्या॥
यावज्जीवमग्निहोत्रं जुहुयादित्यादिश्रुत्याजीवननिमित्तीकृत्या च
ग्निहोत्रादिविधानज्जीवननिमित्तीकृत्य श्रवणविधानात्॥ त्वंपदा व
र्थविवेकाय संन्यासः सर्वकर्मणां॥ श्रुत्या विधीयते यस्मात्त्यागी पति श्रुत्येद विहितो
तो भवेत्॥ येन केन कर्मणा॥ [illegible] कस्यकरणे न तत्र प्रत्यवाय इति स्फुरे
वपतितोयथाभवेत्॥ संन्यासस्य॥ अंजकस्य परिवर्जनाद सौ सद्य ए
वपतितोन संशय इति वार्तिकाचार्य संक्षेपशारीरकाचार्याभ्यांश्र ॥२७॥

वणादिरहितस्य संन्यासिनः पातित्याभिधानाच्च॥ गृहस्थादीनां श्रवणादिका
र्यं दिने दिने तु वेदांतश्रवणाद्भक्तिसंयुतात्॥ गुरुशुश्रूषया लब्धात्कृच्छ्रा ल
सीतिफलं लभेत्॥ अन्ये तु वेदांतश्रवणे साधनचतुष्टयसंपन्नस्यैवाधिका
रात्॥ गृहस्थादेः श्रवणाधिकार एव नास्ति॥ श्रुतिषु याज्ञवल्क्यजनकप्रभृ
तीनां तत्त्वज्ञानप्रतिपादकेष्वाख्यायिकानां ब्रह्मात्मनिताप्त्यर्थत्वात्पर्यव
सायमेव वर्तस्तीत्याहुः॥ परं वैराग्यं गुणवैतृष्ण्यं गुणेषु जिहासेति यावत्
तदुक्तं॥ तत् परं पुरुषख्यातेर्गुणवैतृष्ण्यमिति॥ तच्चासंप्रज्ञातसमा
धेरंतरंगसाधनं॥ उक्तं च॥ तीव्रसंवेगानामासन्नः समाधिलाभ इति

इयष्टीःप्रवेशयेत्यत्रयष्टिधरेषु लक्षणा।

तत्त्वानुसंधानं अलमतिप्रसंगेन॥एवंकर्मवाक्यार्थमपकृप्यक्रमादिभिस्तात्पर्यनिर्णयः॥
॥२८॥ प्रकरणादिनालौकिकवाक्यानांतात्पर्यनिर्णयः॥एतादृशतात्पर्यानुपपत्तिः प
पूर्वोक्तलक्षणाबीजं॥नत्वन्वयानुपपत्तिः॥तस्यायष्टीःप्रवेशयेत्यादा
वसंभवात॥गंगायांघोषइत्यादौतात्पर्यानुपपत्तेरसंभवात॥नके
वलंलक्षणापदमात्रवृत्तिःकिंतुवाक्यवृत्तिरपिगंभीरायांनद्यांघोष
॥रा॥ इत्यादौपदसमुदायात्मकवाक्यस्यतीरलक्षणास्वीकारात॥अतएवा
र्थवादवाक्यानांप्राशस्त्यलक्षणा॥अन्यथापदानांतदैवेर्थ्यंस्यात॥अ
तएवप्राशस्त्यपदार्थप्रत्यायकत्वेनार्थवादवाक्यानांपदस्तवानी ॥२८॥

निरूपकत्वेन।यथासोरोदीदित्यादिनिंदार्थवादवाक्यानांनिंदितत्वेलक्षणा।

यतयापदैकवाक्यत्वं॥स्वार्थतात्पर्यवतांसमिधोयजतीतिदर्शपूर्णमासा
भ्यांस्वर्गकामोयजेतेत्यादिवाक्यानामुपकार्योपकारकाकांक्षायैक
वाक्यत्वंवाक्यैकवाक्यत्वं॥एवंचावांतरवाक्यार्थज्ञानमितिमहा
वाक्यार्थज्ञानेकारणं॥तथान्वयव्यतिरेकानुविधानात॥एवंयथो
क्तमहाकारिसंपन्नंवाक्यंपरोक्षापरोक्षभेदेनद्विविधांप्रमामुत्पाद
यति॥तत्रपरोक्षार्थप्रतिपादकंवाक्यंपरोक्षप्रमोत्पादकं॥यथास्व
त र्गकामोयजेत॥सदेवसौम्येदमग्रआसीद्ब्रह्मास्तीतिवाक्यं॥परोक्षत्वं
नाममानाद्वृत्तसंवित्तादात्म्याभावोयोग्यस्यविषयस्य॥धर्माधर्मयो

तत्त्वानुसंधानं रयोग्यत्वान्नप्रत्यक्षत्वं ॥ अपरोक्षार्थप्रतिपादकं वाक्यमपरोक्षप्रमोत्पाद
॥२९॥ द कं ॥ यथाऽहमस्तत्त्वमसि तत्त्वमसीत्यादिवाक्यं ॥ अपरोक्षत्वं नाम वृत्तिसं ना
विदात्तोत्स्यं भ्रान्तावृत्तिसंवित्साक्षिचैतन्यं ॥ अंतःकरणोपहितं चैतन्यं
साक्षी ॥ तस्या वृत्तत्वं जरादांध्यप्रसंगः ॥ तादात्म्यं नाम तद्भिन्नत्वे सति
तदभिन्नसत्ताकत्वं ॥ तथा च दशमस्त्वमसीत्यत्र दशमस्य त्वंपदा
र्थाभिन्नतयापरोक्षत्वेन वाक्याद्दशमापरोक्षप्रमैव जायते ॥ दशमो
ऽस्मीति ॥ ननु वाक्यात्परोक्षज्ञानं मनसा तत्साक्षात्कारः ॥ मनसोऽनि
न्द्रियत्वस्योक्तत्वाद्वृत्तिप्रत्युपादानत्वेन करणत्वायोगाच्च ॥ प्रमा ॥२९॥

णजन्यापरोक्षज्ञानस्यैव भ्रमनिवर्तकत्वाच्च ॥ एवं तत्त्वमसीत्यत्रापि तत्
त्पदलक्ष्यस्य [illegible] ब्रह्मणः त्वंपदलक्ष्यसाक्ष्यभिन्नतया नावृत्तसं
ता३ विदात्मत्वान्नित्यापरोक्षत्वेन त्वं बोधितत्वंपदार्थस्याधिकारिणो मनन
निदिध्यासनसंस्कृतांतःकरणसहकृतविचारिततत्त्वमस्यादिवाक्या मद
५५ दहं ब्रह्मास्मीत्यपरोक्षप्रमा जायते ॥ एवं च सति सर्वे वेदा यत्पदमाम
नेति तं त्वौपनिषदं पुरुषं पृच्छामि ॥ नावेदविन्मनुते तं बृहंतमित्या
दिश्रुतयः सामंजस्येनोपपद्यंते ॥ मनसैवानुद्रष्टव्यमित्यादिश्रुति
स्तु मनसो वाक्यसहकारित्वप्रतिपादनपरा ॥ अन्यथा यन्मनसा न

३ पीनोदेवदत्तोदिवानभुंक्ते इत्यत्र

तत्त्वानुसंधा॰ मनुतइत्यादिश्रुतिविरोधप्रसंगात् ॥ एवंर्थापत्तिप्रमा निरूपिता ॥ अनुप
॥३०॥ पद्यमानार्थदर्शनात्तदुपपादकीभूतार्थांतरकल्प [illegible]
नमर्थापत्तिःप्रमा ॥ यथा दिवाभुंजानस्य देवदत्तस्य रात्रिभोजनं विनानु
पपद्यमानपीनत्वज्ञानात्तदुपपादकरात्रिभोजनकल्पनं ॥ तत्रानुप
पद्यमानपीनत्वज्ञानंकरणं ॥ रात्रिभोजनकल्पनंफलं ॥ सा चार्थाप
त्तिर्द्विविधा दृष्टार्थापत्तिः श्रुतार्थापत्तिश्चेति ॥ दृष्टार्थापत्तिर्यथा शुक्ता
विदं रजतमित्यनुभूयमानरजतस्य नेदं रजतमिति बाध्यत्वं दृष्टं ॥
तस्य मिथ्यात्वमंतरेणसत्यत्वेनुपपन्नंस मिथ्यात्वंकल्पयतीनचेदं ॥३०॥

१ते५

रजतमितिज्ञानद्वयं ॥ पुरोवर्तिनि प्रत्यक्षत्वाभावप्रसंगात् ॥ रजतस्यासत्वे
तज्ज्ञानस्य प्रत्यक्षत्वाभावप्रसंगात् ॥ सत्वे बाधाभावप्रसंगात् ॥ देशांत
रसत्वे रजतेंद्रियसन्निकर्षाभावेन प्रत्यक्षत्वाभावप्रसंगात् ॥ रजतं
साक्षात्करोमीत्यनुभवस्य सर्वानुभवसिद्धत्वात् ॥ तस्माद्भ्रमकाले
वश्यमं शुक्तिकाज्ञाकत्वे रजतमुत्पद्यत इत्यंगीकर्त्तव्यं ॥ रजतोत्पादकत्वौ कि
कसामग्र्यभावेपि पुरोवर्तींद्रियसन्निकर्षानंतरमिदमाद्याकार
वृत्तौ सत्यामिदमवच्छिन्नचैतन्यनिष्ठाशुक्तित्वप्रकारिकाविद्या
साहश्यदर्शनसमुद्बुद्धसंस्कारसहकृतारजताकारेणतज्ज्ञाना

तत्त्वानुसंधानं कारेण च परिणमते । तस्य च मायाकार्यत्वान्मिथ्यात्वं । एवं दृष्टार्था
॥३१॥ पत्तिर्निरूपिता । श्रुतार्थापत्तिर्यथा "तरति शोकमात्मविदिति । शोको
पलक्षितप्रमातृत्वादिबंधस्य ज्ञाननिवर्त्यत्वं श्रुतं तस्यामिथ्यात्वमंतरे
णासत्यत्वमनुपपन्नं सन्मिथ्यात्वं कल्पयति । सेयं श्रुतार्थापत्तिः अंतः
करणविशिष्टचैतन्यं प्रमाता कर्ता भोक्ता । केवलस्यात्मनो संगत्वेन
प्रमा[illegible]तृत्वाद्यनुपपत्तेः । शुक्तिरजतवदात्मा ज्ञानैर्दंतः करणादिकं
स्वरूपेण प्रत्यगात्मन्यध्यस्तं । अध्यासो नाम परत्र परावभासः । स च
द्विविधः ज्ञानाध्यासोऽर्थाध्यासश्चेति तत्रातस्मिंस्तद्बुद्धिर्ज्ञानाध्यासः ॥ ॥३१॥

यथा शुक्तौ रजतबुद्धिः । यथा वात्मन्यनात्मबुद्धिः । प्रमाणाजन्यज्ञान
विषयः पूर्वदृष्टसजातीयोऽर्थाध्यासः । सोऽपि द्विविधः प्रातीतिको व्याव
३क हारिकश्चेति । तत्रागंतुकदोषजन्यः प्रातीतिकः यथा शुक्तिरजतादेः ।
प्रातीतिकभिन्नो व्यावहारिकः । यथाकाशादिघटांतंजगत्तथा च प्र न४
मातृत्वादिबंधस्याध्यस्ततया मिथ्यात्वमुपपद्यते । [illegible]तदभिप्राये
णोक्तं भगवता भाष्यकारेण स्मृतिरूपः परत्र पूर्वदृष्टा[illegible]
वभास इति । अस्यार्थः । स्मृतिरूपः संस्कारजन्यत्वेन स्मृतिसदृशः
पूर्वदृष्टावभासः पूर्वदृष्टसजातीयावभास इति ज्ञानाध्यासपक्षे ॥

श्री १

तत्त्वानुसंधानं पधासपक्षे तु प्रमाणजन्यज्ञानविषयः पूर्वदृष्टसजातीय इति ॥ एवं श्रु
॥३२॥ तार्थापत्तिर्निरूपिता ॥ अभावप्रमायोऽयानुपलब्धिकरणिका ॥ यथा घ
टानुपलब्ध्या घटाभावप्रमा भूतले जायते तत्रानुपलब्धिरेव करणं ने
इंद्रियस्य तत तत्र ग्रहणेन ४ न्द्रियं ॥ तस्याधिकरणग्रहणोपक्षीणत्वादभावेन सममसंनिकर्षा भावा
च्च ॥ असाधारणकारणं करणं ॥ नियतपूर्ववर्त्ति कारणं ॥ तच्च द्विविधं
मुपादानकारणं निमित्तकारणं चेति ॥ कार्यान्वितं कारणमुपादानं
यथा घटादेर्मृदादिः ॥ कार्यानुकूलव्यापारवन्निमित्तं यथा घटादेः कुला
लादिः ॥ त्रमुत्तनुमायोपहितं मस्त्वपंचस्योपाधिप्राधान्येनोपादानं स्व ॥३२॥

तत्र अस्य एतत् ईक्षणं तन्नवन् कथं बहु प्रभूतं स्यां न भवेयं ॥ प्र
जायेय उत्पद्येय २०१

त१ प्रधान्येन निमित्तं च भवति ॥ तदैक्षत बहु स्यां प्रजायेयेत्यादिश्रुतेः ॥ प्रकृति
श्च प्रतिज्ञादृष्टान्तानुपरोधादिति सूत्राच्च ॥ तच्च कारणं द्विविधं ॥ साधारण
मसाधारणं चेति ॥ कार्यमात्रोत्पादकं साधारणकारणं यथा दृष्टादिः ॥ का
र्यविशेषोत्पादकमसाधारणं कारणं यथा चाक्षुषादिप्रमायां चक्षुरा
दिः ॥ तथा च घटाद्यभावप्रमायां घटाद्यनुपलब्धिरसाधारणं कारणं तदे
व करणं ॥ यद्यत्र घटः स्यादिति तर्कितेन प्रतियोगिसत्त्वेन तदुपलम्भे
उपलंभरूपः ३ नेति प्रसंजितोपलब्धिरूपः प्रतियोगी यस्याः सा योग्यानुपलब्धिः ॥ त
याभावो गृह्यते ॥ नञ्पदोल्लिखितधीविषयोऽभावः ॥ सोऽत्यन्ताभावप्राक वा

तस्वानुसंधानं वभेदे प्रमाणाभावात् ॥ तथाहि सदेव सोम्येदमग्र आसीत्सत्वाचावरस्यें श्रुति ति १
॥३३॥ सूत्राभ्यां प्रागुत्पत्तेः कार्यस्य कारणात्मना सत्वप्रतिपादनेन प्रागभाव
स्य दुर्निरूपत्वात् ॥ प्रागात्मज्ञानात्कार्यस्य निरन्वयनाशोनोनंशीकारेण ध्वं
सस्यापि दुर्निरूपत्वात् ॥ अनादिनित्यत्रैकालिकोन्योन्याभावमत्वेद्वैत त्यंताभावा
श्रुतिविरोधापत्तेः ॥ अतोत्यंताभाव एक एव ॥ सच द्विविधः ॥ पारमार्थिको व्या
क वहारिकश्चेति ॥ नेहनानास्तिकिंचनेत्यादिश्रुतिप्रतिपादितप्रपंचात्यंता
भावः पारमार्थिकः ॥ स चाधिष्ठानस्वरूपोधिष्ठानातिरिक्त इति केचित् ॥
घटात्यंताभावो व्यावहारिकः ॥ अयमेव भेदप्रतियोगिकः ॥ भूतलं घटोनेत्या ॥३३॥

श्र१ २स श्र५

दिप्रतीतिविषयो भेद इत्युच्यते ॥ घटोनास्तीत्यादिविषयोत्यंताभाव इत्यु
च्यते वादिभिः ॥ सर्वोप्यनित्य एव सर्वस्य ब्रह्मज्ञाननिवर्त्यत्वात् ॥ अन्ये तु लौ
किकतंत्रांतरबुद्धिमनुसरंतोभावभेदं स्वीचक्रुः ॥ तथाहि प्रागभावप्रध्वंसा
भावोत्यंताभावोन्योन्याभावभेदाच्चतुर्विधोभावः ॥ उत्पत्तेः पूर्वं कारणे का
र्याभावः प्रागभावः ॥ यथा मृदादौ घटाद्यभावः ॥ उत्पन्नस्य कार्यस्य कार
प्र णे नाशो ध्वंसः ॥ यथा मुद्गरादिप्रहरणानंतरं कपालादौ घटाद्यभावः ॥ प्र
तियोग्यसमानाधिकरणाभावोत्यंताभावः ॥ यथा भूतलादौ घटाद्यभावः ॥
प्रतियोगिसमानाधिकरणाभावोन्योन्याभावः ॥ यथा भूतलादौ घटभे

दभावः

अ

तत्त्वानुसंधानं दः॥ सर्वे प्यभावोनित्याश्चेति॥ एवमभावप्रमा निरूपिता॥ तावंद्विविधप्र
॥३४॥ मयासावरणमज्ञानं निवर्तते॥ तत्र परोक्षप्रमयासत्वापादकमौढ्याज्ञान
निवृत्तिः॥ अपरोक्षप्रमयासत्वाभानापादकाज्ञाननिवृत्तिः॥ प्रमाभिन्नं ज्ञा
नमप्रमा॥ सा च द्विविधा॥ स्मृतिरनुभूतिश्चेति॥ संस्कारमात्रजन्यं ज्ञानं स्मृ
धा तिः॥ सापि द्विविधा॥ यथार्थायथार्था चेति भेदात्॥ यथार्थस्मृतिरपि द्विवि च ३५
३६ धा॥ आत्मस्मृतिरनात्मस्मृतिश्चेति॥ तत्र व्यावहारिकं प्रपंचो मिथ्या दृश्य
त्वाच्छुक्तिरूप्यवदित्यनुमानसिद्धमिथ्यात्वानुसंधानं यथार्थानात्म
स्मरणं॥ तत्त्वमस्यादिवाक्यार्थानुसंधानं यथार्थात्मस्मरणं॥ अयथार्थ ॥३४॥

स्मृतिरपि॥ द्विविधा पूर्ववत्॥ प्रपंचस्य सत्यत्वानुसंधानमयथार्थानात्मस्मर
प णं॥ मिथ्यावस्तुत्वानां च स्वाहंकारादिषु सत्यत्वानुसंधानमात्मनि कर्तृत्वानुसं ष२
धानं वायथार्थात्मस्मरणं॥ स्वप्नस्त्वनुभव एव न स्मृतिरिति वक्ष्यते॥ स्मृति
भिन्नं ज्ञानमनुभूतिः॥ सा च द्विविधा यथार्थायथार्था चेति॥ यथार्थानुभूतिः
प्रमा॥ सा निरूपिता॥ बाधितविषयानुभूतिरयथार्था॥ सापि द्विविधा॥ संशयो व
निश्चयश्चेति॥ एकस्मिन् धर्मिणि भासमानविरुद्धनानाकोटिकं ज्ञानं संशयः॥
उक्तं च लक्षणस्य धर्मिज्ञप्रमायामतिव्याप्तिरित्याशंक्य लक्षणान्तरमाह॥ स
स्य संशयस्याकारः स्थाणुत्वादिः॥ तद्विरुद्धाकारः पुरुषादिः॥ तदुभयवैशि

तत्त्वानुसंधा० स्यज्ञानं स्थाणुर्वा पुरुषो वेत्यादि तदविरुद्धज्ञानं संशयः ॥ एकस्मिन्धर्मिणि स्वा
॥३५॥ कारविरुद्धद्वयवैशिष्ट्यावगाहिज्ञानाविरुद्धज्ञानं संशय इति केचित् ॥ स च
द्विविधः प्रमाणसंशयः प्रमेयसंशयश्चेति ॥ तत्र प्रमाणगतासंभावना प्रमा
णसंशयः ॥ यथानभ्यासदशायां समुत्पन्नं ज्ञानं प्रमाणं न वेति संशयः स
च प्रामाण्यनिश्चयात् निवर्तते ॥ प्रामाण्यनिश्चयस्तु स्वत एव ॥ प्रामाण्यं ना
म तद्वति तत्प्रकारकत्वं ॥ तस्य स्वतस्त्वं नाम यावत्स्वाश्रयग्राहकग्राह्यत्वं ॥ स्वा व
श्रयो वृत्तिज्ञानं ॥ तद्ग्राहकं साक्षिचैतन्यं तेन तन्निष्ठप्रामाण्यं गृह्यते स्वतः इति
प्रामाण्यं अप्रामाण्यं परतो गृह्यते ॥ तच्च तदभाववति तत्प्रकारकत्वं ॥ तद ॥३५॥

व भाववत्त्वस्य वृत्तिज्ञानानुपनीतत्वेन साक्षिणा ग्रहीतुमशक्यतया परत एवाप्रा
माण्यं गृह्यते ॥ प्रामाण्यस्वतस्त्वपक्षे संशयो दोषवशादुपपद्यते ॥ इत्ययं प्रमा
श्र णसंशयः ॥ वेदान्तानां द्वितीये ब्रह्मणि प्रमाणं न वेति संशयः ॥ करणगतासंभाव
ना सा च श्रवणेन निवर्तते ॥ तच्च निरूपितं ॥ तदपि श्रवणं शारीरकप्रथमाध्या
यपठनेन निष्पद्यते ॥ प्रमेयगतासंभावना द्विविधात्मगता तत्त्वगता चेति श्र५
स्थाणुर्वा पुरुषो वेत्यत्र तत्त्वगतसंशयः ॥ आत्मगतसंशयोऽनेकविधः ॥ तथाहि
द्वितीयं ब्रह्माद्वितीयं सद्वा द्वितीयत्वेप्यानंदगुणकं चानंदस्वरूपं वेत्यादि परमात्म
गतसंशयः ॥ आत्मा देहाद्व्यतिरिक्तो वा न वा देहाद्व्यतिरिक्तत्वेपि कर्ता वाऽकर्ता वा ॥

इति श्र

तत्वानुसंधा ऽस्मत्कर्तृत्वेपि चिद्रूपो वाऽचिद्रूपो वा ॥ चिद्रूपत्वेप्यानंदात्मको वा न वेत्यादिर्जीवगतसं
॥३९॥ शयः ॥ जीवस्य सच्चिदानंदरूपत्वेपि परमात्मना सहैक्यं संभवति न वा ॥ ऐक्येपि तज्
ज्ञानं मोक्षसाधनं न वा ॥ मोक्षसाधनत्वेपि ज्ञानं कर्मसमुच्चितं मोक्षसाधनं वा केव तज्ञ
लज्ञानं वेत्येवमात्मसंशयः ॥ अयं सर्वोपि संशयो मननेन तर्कात्मकेन निवर्तते ॥ त
र्को नामानिष्टप्रसंगः ॥ व्याप्यारोपेण व्यापकापादनमिति यावत् ॥ व्याप्यश्चायं व्याप्य
व्याप्तिनिरूपकं व्यापकं ॥ तथा चायं दिक्प्रपंचः स तस्मात्तर्के द्वितीयश्रुतिविरोधः स्या
त् ॥ यदि परमात्मा जीवभिन्नः स्यात्तर्हि घटादिवदनात्मत्वेनानित्य एव स्यात् ॥ य
द्यात्मानंदो न स्यात्तर्हि कोपि न व्याप्रियेतेत्यादि व्याप्यारोपेण व्यापकप्रसंजनं ॥३९॥

१ प्रसाकिः

रूपस्तर्कोऽस्मत्कर्तृदृष्ट्या ॥ एतच्च निरूपितं ॥ एतन्मननं शारीरकद्वितीयाध्या
यपठनेन निष्पाद्यते ॥ संशयविरोधिज्ञानं निश्चयः ॥ स च द्विविधः ॥ यथार्थोऽय
थार्थश्चेति ॥ अविसंवादियथार्थनिश्चयः ॥ स चोक्त एव ॥ विसंवादियथार्थनि
श्चयः ॥ स च द्विविधः ॥ तर्को विपर्ययश्चेति ॥ तर्कस्तूक्त एव ॥ विपर्ययो मिथ्याज्ञा
नं ॥ अतस्मिंस्तद्बुद्धिरिति यावत् ॥ स च द्विविधः ॥ निरुपाधि[illegible]कः सोपाधि
कश्चेति ॥ तत्राद्यो द्विविधः ॥ बाह्योऽभ्यंतरश्चेति ॥ शुक्त्यादाविदं रजतमित्या
दिर्बाह्यः ॥ अहमज्ञो ब्रह्म न जानामीत्याद्याभ्यंतरः ॥ सोपाधिको द्विविधः ॥ बा पि
ह्योऽभ्यंतरश्चेति ॥ लोहितः स्फटिक इत्यादिर्बाह्यः ॥ कर्त्रादिप्रपंचवानात्मोपिव आ

प्या

तत्त्वानुसंधानं ध्यः सोपाधिकः ॥ कर्मणोविद्याकार्यत्वात्तत्त्वज्ञानेनैव निवृत्तेर्यज्ज्ञानेन प्रारब्धक्षयपर्यंतं स
।।२७।। प प्रपंचोत्पत्तिर्दर्शनात्कर्तृत्वादिभ्रमोभ्यंतरः ॥ स्व प्नोप्याभ्यंतरः सोपाधिकभ्रम
एवं न तु स्मृतिः ॥ तथाहि ॥ जाग्रद्भोगप्रदकर्मोपरमे सति स्वप्नभोगप्रदकर्मोद्रेके स
कलविषयेंद्रियादिवासनावासितं निद्रादोषेण प्लुतमंतःकरणं रथादिविषयाद्या
कारेण ग्राहकेंद्रियाद्याकारेण रथादिविषयाकारवृत्त्याकारेण भाते ॥ अंतःकर चपरिणा
णपरिणतसाक्षिस्वयमन्यानभावं स्पत्तत्सर्वमेव भासयति ॥ अत एव स्वप्ने
साक्षिणः स्वप्रकाशत्वं सुज्ञेयं ॥ जाग्रदवस्थायां सूर्यादितेजोभिः संकीर्णत्वात्सा
स्व क्षिणः प्रकाशत्वं दुर्विज्ञेयं ॥ स्वप्ने तु सूर्यादीनां जाग्रत्पदार्थानामुपरतत्वा ।।२७।।

त्स्वप्रकाशत्वं विवेक्तुं शक्यते ॥ तथा च श्रुतिः ॥ स यत्र प्रस्वपित्यस्य लोकस्य सर्वावतो [illegible] व१
मात्रामुपादाय स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपित्यत्रायं पुरु
षः स्वयंज्योतिर्भवति न तत्र रथा न रथयोगा न पंथानो भवंत्य[illegible]थ रथान् रथयोगा
न्पथः सृजत इत्यादि ॥ स्वयंज्योतिः स्वप्रकाशः ॥ चैतन्याविषय इति यावत् ॥ एवं स्व[illegible]प्नोप्य
नुभवरूप एव न स्मृतिः ॥ अन्यथा रथं पश्यामीत्यनुभवविरोधप्रसंगात् ॥ स्वप्नपदा
र्थानामंतःकरणमायाद्वारा शुद्धचैतन्याध्यस्तत्वेन [illegible] दानींतत्साक्षात्काराभावे
न बाधाभावेपि सोपाधिकत्वयोपाधिनिवृत्त्या तन्निवृत्तिरिति न जाग्रदवस्थाया
मनुवृत्तिः ॥ कर्मनिद्रोपप्लुतमंतःकरणमुपाधिः ॥ केचित्तु स्वप्नाध्यासं निरुपाधि

तत्त्वानुसंधा॰ केवदंति ॥ तत्र विरोधिज्ञानप्रत्ययेन तं निवृत्तिः पुनश्च विपर्ययः प्रकारांतरेण द्विविधः ॥
॥३८॥ अंतःकरणवृत्तिरूपो ऽविद्यावृत्तिरूपश्चेति ॥ स्वप्नादिरंतःकरणवृत्तिरूपः रजतादिभ्रमो
ऽविद्यावृत्तिरूपः संज्ञायस्त्वविद्यावृत्तिरेव ॥ तत्रैवं सति निरुपाधिकविपर्ययो निदि
ध्यासनेन नि[illegible]वर्तते ॥ सोपाधिकस्तूपाधिनिवृत्त्या निवर्तते ॥ निदिध्यासनं निर
[illegible] पितमेव ॥ तदपि शारीरके सूत्री
याध्यायपठनेन निष्पद्यते ॥ एवं च श्रवणमननिदिध्यासनैरसंभावनाविपरीत
भावनानिवृत्तौ वसत्यन्यस्मिन्प्रतिबंधे तत्त्वमस्यादिवाक्याद् हं ब्रह्मास्मीत्यपरो
क्षप्रमा जायते ॥ तदुक्तं ॥ रोहिकमप्यप्रस्तुतप्रतिबंधे तद्दर्शनादिति ॥ प्रतिबंध ॥३८॥

१ अस्वातंत्र्येण

स्त्रिविधः ॥ भूतभाविवर्तमानभेदात् ॥ भूतप्रतिबंधः पूर्वानुभूतविषय[illegible]स्यावैत्रेपन
पुनःपुनःस्मरणं ॥ तदुपाधिकब्रह्मानुसंधानेन तन्निवृत्तिर्यथाभिक्षोः पूर्वानुभूत
महिष्यादिस्मरणेन तत्त्वज्ञानानुत्पत्तौ गुरूपदिष्टतदुपाधिकब्रह्मानुसंधानेन तन्नि
वृत्तिरिति वदंति ॥ भाविप्रतिबंधो द्विविधः ॥ प्रारब्धशेषो ब्रह्मलोकेछा चेति ॥ तत्र
प्रारब्धं कर्म द्विविधं ॥ फलाभिसंधिकृतं केवलं चेति ॥ तत्र फलाभिसंधिकृतं फलं कर्म
दत्वैव नश्यति ॥ तस्मिन्सति ज्ञानं नोत्पद्यते ॥ तस्य प्रबलतरत्वात् ॥ तथा च श्रुतिः
स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते तदभिसंपद्यते ॥
नाहत्वां प्रारब्धशेषो भाविप्रतिबंधः ॥ केवलं प्रारब्धं तत्त्वज्ञानहेतुः पाप

तत्वानुसंधा. ॥३९॥ निवृत्तिद्वारा ॥ तथाच श्रुतिस्मृती ॥ धर्मेण पापमपनुदति ॥ ज्ञानमुत्पद्यते पुंसां क्षया
त्पापस्य कर्मण इति ॥ कषायैः कर्मभिः पक्वे ततो ज्ञानं प्रवर्त्तत इति च ॥ एवं च भावि
प्रतिबंधस्य प्रारब्धशेषस्य भोगेन निवृत्तौ सत्यां पि श्रवणादौ ज्ञानोदयः ॥ यथाहुः ॥
आगामिप्रतिबंधो हि वामदेवे समीरितः ॥ एकेन जन्मना क्षीणो भरतस्य त्रिजन्म
॥३९॥ भिरिति ॥ ब्रह्मलोके[illegible]या ब्रह्मसाक्षात्कारोत्पत्तिप्रतिबंधकत्वं विचारणस्वा
मिनो वदंति स्म ॥ ब्रह्मलोकाभिवांछायां सम्यक् संत्यां निरुध्य तां ॥ विचारयेद्य
आत्मानं तु न साक्षात्करोत्ययमिति ॥ स पुनर्वेदांतश्रवणादिमहिम्ना ब्रह्मलो
कं गत्वा निर्गुणब्रह्म साक्षात्करोति ॥ तथाच श्रुतिः ॥ वेदांतविज्ञानसुनिश्चि ॥३९॥

तार्थाः संन्यासयोगाद्यतयः शुद्धसत्वाः ॥ ते ब्रह्मलोके तु परांतकाले परामृतात्परिमु
च्यंति सर्व इति ॥ स पुनस्तत्रैव मुच्यते ॥ वर्तमानप्रतिबंधं तन्निवृत्त्युपायं च विद्यारण्य च
स्वामिनो वर्णयांचक्रुः ॥ प्रतिबंधो वर्तमानो विषयासक्तिलक्षणः ॥ प्रज्ञामांद्यं
कुतर्कश्च विपर्ययदुराग्रहः ॥ शमाद्यैः श्रवणाद्यैश्च[illegible] तत्र तत्रोचितैः क्षयं ॥ नीते
ऽस्मिन्प्रतिबंधे तः स्वस्य ब्रह्मत्वमश्नुत इति ॥ ततः श्रवणादिना सकलप्रति वा
बंधकनिवृत्त्या वाक्याद्ब्रह्मसाक्षात्कारोत्पत्तौ शमदमोपरतितितिक्षाश्रद्धा
समाधानान्यंतरंगसाधनानि ॥ अंतरिंद्रियनिग्रहः शमः ॥ बाह्येंद्रियनिग्र
हो दमः ॥ उपरतिः संन्यासः ॥ तितिक्षा द्वंद्वसहिष्णुता ॥ श्रद्धा गुरुवेदांतवाक्ये

तत्त्वानुसंधा
॥४०॥
ये

श्रुविश्वासः समाधानं श्रवणादिषु चित्तैकाग्र्यं शांतो दांत उपरतस्तितिक्षुः समा
॥४०॥ हितो भूत्वात्मन्येवात्मानं पश्यतीत्यादिश्रुतेः सूत्रकारोप्याह शमदमाद्युपेतः स्या
ये त्तथापि तद्विधेस्तदंगतया तेषामवश्यानुष्ठेयत्वादिति यज्ञादयो बहिरंगसाध
नानि तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसानाशकेनेति
श्रुतेः सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदिति सूत्रमप्युक्तं तदेवं मननादिसंस्कृतचि
त्तदर्पणसहकृतविचारितमहावाक्योत्पन्नेनाहं ब्रह्मास्मीत्यप्रतिबंधब्रह्म
साक्षात्कारेण ज्ञानेन निरस्ते [illegible] संचितकर्मजातं नष्ट्वा
दागामिकर्मणामश्लेषात्प्रारब्धापादितविषयमनुभवन्क्रमात्स्फुरखंडैकरस ॥४०॥

सच्चिदानंदब्रह्मात्मनावतिष्ठते एतादृशं फलं चतुर्थाध्यायपठनेन भवतीति सांप्र ८
यिकानां [illegible] ति अन्ये तु गुरुमुखात्संपूर्णशास्त्रपठनं श्रवणं तस्य पठितस्य युक्ति
भिरनुसंधानं मननं तस्यैव पुनः पुनरावृत्तिर्निदिध्यासनं अनंतरं साक्षा
त्कार इत्याहुः वस्तुतस्तु मुमुक्षूत्तमानां मुख्याधिकारिणां युक्तानामयुक्तानां
च श्लोकेन श्लोकार्धेन वा ब्रह्मसाक्षात्कारो भवत्येवात्र बदस्याचिंत्यशक्तित्वा
त् तत्र शास्त्रस्य शरीरकादेर्मुख्याधिकारिविषयत्वोपपत्तेः तदुक्तं महाभारते
आत्मानं विंदते यस्तु सर्वभूतगुहाशयं श्लोकेन यदि वार्धेन क्षीणं तस्य प्रयो वातद्वधेन
जनमिति संप्रदायिकैरप्युक्तं तत्र वि[illegible] राट् भूत्वगुः श्वेतकेतुः पित्राचष्टेति

तत्वानुसंधा चत्वारः शिष्यास्तेषु श्वेतकेतोर्हंसपेक्षायामप्यन्येषां तदभावान्मुख्याधि
॥४१॥ कारिणां श्लोकेनैव ज्ञानमित्युक्तं ॥ वाक्यश्रवण मात्रेण पिशाचवदवा
प्नुयादिति ॥ एतावानत्र विशेषः अव्युत्पन्नानां परतंत्रप्रज्ञत्वादसंभावनादि
भगवता४ संभवाद्ध्याननिष्ठापेक्षिता ॥ तदुक्तं अन्ये त्वेवमजानंतः श्रुत्वान्येभ्य उपास
ते ॥ ते पि चातितरंत्येव मृत्युं श्रुतिपरायणा इति ॥ विचारसागरेप्युक्तं ॥ अ
त्यंतबुद्धिमांद्याद्वा सामग्र्या वाप्यसंभवात् ॥ यो विचारं न लभते ब्रह्मोपा
सीत सोनिशमिति ॥ मरणे ब्रह्मलोके वा तत्त्वं ज्ञात्वा विमुच्यत इति च ॥
पतंजलिनाप्युक्तं ॥ ततः प्रत्यक्चेतनाधिगमोंतरायाभावश्चेति ॥ प्रमाणकु ॥४१॥

प्यं

शलानां संशयादिग्रस्तानां पंडितानामपि ध्याननिष्ठापेक्षिता ॥ तदुक्तं
अपि संराधने प्रत्यक्षानुमानाभ्यामिति ॥ अन्यत्राप्युक्तं ॥ बहुव्याकुल
चित्तानां विचारात्तत्त्वधीर्न चेत् ॥ योगो मुख्यस्ततस्तेषां धीदर्पस्तेन न
श्यतीति ॥ संशयादिरहितानां ध्याननिष्ठा चेत्स्यात्त [illegible] ॥ तदुक्तं भगवता
अनन्याश्चिंतयंतो मां ये जनाः पर्युपासते ॥ तेषां नित्याभियुक्तानां योग
क्षेमं वहाम्यहं ॥ मच्चित्ता मद्गतप्राणा बोधयंतः परस्परं ॥ कथयंतश्च मां
नित्यं तुष्यंति च रमंति चेति ॥ न तु ज्ञानिनो ध्यानविधिः देहात्माभिमा
नभ्रंशतया कर्तृत्वाभावेन तस्य विधिकिंकरत्वायोगात् ॥ तदुक्तं ॥

तत्त्वानुसंधा ||५२|| अनुज्ञापरिहारौ देहसंबंधाज्ज्योतिरादिवदिति नाप्यकारैरप्युक्तं अहं ब्रह्मा
स्मीत्येतदवसानाय्येव सर्वे विधयः सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्ष
ति पराणि देहेंद्रियादिष्वहं ममाभिमानवतस्तथा प्रमातृत्वानुपपत्तौ प्रमा
णप्रवृत्त्यनुपपत्तेरिति च गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनात् सद्ब्र त्र
[illegible] मा ह्माहमस्मीति बोधे कार्यं कथं भवेदिस्फुत्तेज्ञानिनो ध्यानाभावे व्यवहा
रप्राचुर्यात् दृष्टदुःखमात्रं न मोक्षप्रतिबंधः तदुक्तं तन्निष्ठस्य मोक्षो
पदेशात् दिति तस्मिन्ब्रह्मात्मनि निष्ठानन्यव्यापारतया परिसमाप्तिः प
र्यवसानं यस्य स तथा तस्य ज्ञानैकशरणस्येति यावत् तथैव भगवानप्या व ||५२||

ह य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते
यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते हत्वापि स इमाल्लोकान्न हंति न नि ब
शत ध्यते योषोपि हयमेधसहस्राण्यथ कुरुते ब्रह्मघातलक्षाणि च परमार्थविन्न पु
ण्यैर्न च पापैर्लिप्यते विमल[illegible] इति विद्यारण्यैरप्युक्तं पूर्णबोधे तदन्यो
बोऽप्रतिबंधाय दा तदं मोक्षो विनिश्चितः किंतु दृष्टदुःखं न तत्त्वप्रतीति बोधस्य
पूर्णत्वावधिः विष्णुपुराणे पराशरेण दर्शितः अहं हरिः सर्वमिदं जनार्दनो
नान्यत्ततः कारणकार्यजातं ईदृङ्मनो यस्य न तस्य भूयो भवोद्भवा द्वंद्वगा
ती दा भवंति ब्रह्मगीतायां ब्रह्माणं प्रति शिवेनाप्युक्तं अहं हि सर्वेन च किंचिद
१कं

तत्त्वानुसंधा.
॥४३॥

न्यन्निरूपणायामनिरूपणायां ॥ इयं हि वेदस्य परा हि निष्ठा स्वानुभूतिश्च तत्संप्र
यश्चेति ॥ उपदेशसाहस्रिकायामपि ॥ देहात्मज्ञानवज्ज्ञानं देहात्मज्ञानबाधकं ॥ आ
त्मन्येव भवेद्यस्य स नेच्छन्नपि मुच्यत इति ॥ अयमस्मीति पुरुष इत्यत्रायमि
ति श्रुतेस्तात्पर्यप्रतिपादनबीजेन विद्यारण्यैरपि दर्शितं तत्त्वदीपे ॥ असंदि
ग्धाविपर्यस्तबोधाद्देहात्मनीक्षते ॥ तद्वद् ब्रह्मेति निर्णेतुमयमित्युच्यते ॥
पुनरिति ॥ सर्वथापि श्रवणादिना ब्रह्मसाक्षात्कारः ॥ ततो ब्रह्मभावलक्षणा
मुक्तिर्भवतीति सिद्धं ॥ तमेव विदित्वातिमृत्युमेति ॥ तरति शोकमात्मवित् ब्र
ह्मैव भवति ॥ एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरूपसंपद्य स्वे

वित्र ॥ ब्रह्म
॥४३॥

न रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः ॥ आत्मानं चेद्विजानीयादयमस्मीति पु
रुषः किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेदिति ॥ यत्पूर्णानंदैकबोधस्तद्ब्रह्मा
हमस्मीति कृतकृत्यो भवतीति ॥ एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारतेत्यादि
श्रुतिस्मृतिभ्यः ॥ शेषोऽपि ॥ वृक्षाग्रच्युतपादोयं यद्वदनिच्छन्नपि क्षितौ पतति ॥
तद्वद्गुणपुरुषज्ञोऽनिच्छन्नपि केवली भवतीति ॥ सा च मुक्तिर्द्विविधा विदेहमु
क्तिर्जीवन्मुक्तिश्चेति ॥ तत्र तत्त्वज्ञानिनो भोगेन प्रारब्धकर्मक्षये वर्तमान
शरीरपातो विदेहमुक्तिः ॥ तदुक्तं* भोगेन त्वितरे क्षपयित्वा संपद्यत इति ॥ अ
न्ये तु भाविशरीरान्तरभावो विदेहमुक्तिः ॥ सा च ज्ञानोत्पत्तिसमकालं ज्ञाने

नश्यत्तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये ॥ ब्रह्मैव सन्ब्रह्माप्येती
त्यादिश्रुतिभ्यः ॥ २ क्षेपकः

इतरे त्वारब्धे का
ये पुण्यपापे जो भे
न क्षपयित्वा कृ
यं कृत्वा ब्रह्म संप
द्यते प्राप्नोति ॥२

तत्वानुसंधा॰ नाज्ञानेनिवृत्तेसंचितकर्मणोंनाशाद्दाँमिकर्मणामश्लेषाद्भोगेनप्रारब्धक्षयाच्छ
॥४४॥ रीरांतरारंभकस्यासंभवात्तद्विनाशेनानारंभकस्यज्ञानसमकालत्वंयुज्यते॥तदु
देहं क्तं॥तीर्थेश्वपचगृहेवानष्टस्मृतिरपित्यजन्॥ज्ञानसमकालमुक्तः कैवल्यं
यातिहतशोकइत्येवंवर्णयांचक्रुः॥श्रवणादिभिरुत्पन्नसाक्षात्कारस्यविद्व तत्व
त्संन्यासिनःकर्तृत्वाद्यखिलबंधप्रतिभासनिवृत्तिर्जीवन्मुक्तिः॥जीवदवस्था
यामितिशेषः॥अन्यथाविदेहमुक्तावतिव्याप्तिःस्यात्॥भोगापादकप्रारब्धप्रा
बल्येपियोगाभ्यासेनतदभिभवसंभवात्॥प्रारब्धापेक्षयायोगाभ्यासेप्रब स
लत्वात्॥अन्यथापुरुषप्रयत्नवैयर्थ्येनचिकित्साशास्त्रमारभ्यामोक्षशास्त्र ॥४४॥

पर्यंतस्यानारंभप्रसंगात्॥अतएवपुरुषप्रयत्नस्यसाफल्यमाहवसिष्ठः॥आ
बाल्यादलमभ्यस्तैःशास्त्रसत्संगमादिभिः॥गुणैःपुरुषयत्नेनसोर्थःसंप्राप्यते
हितइति॥तत्रश्रुतिस्मृतीतिहासपुराणवचनानिप्रमाणानि॥विमुक्तश्च
विमुच्यतइतिश्रुतिः॥योजागर्तिसुषुप्तिस्थोयस्यजाग्रन्नविद्यते॥यस्यनि
र्वासनोबोधःसजीवन्मुक्तउच्यतइतिवासिष्ठे॥प्रजहातियदाकामान्स
र्वान्पार्थमनोगतान्॥आत्मन्येवात्मनातुष्टःस्थितप्रज्ञस्तदोच्यते॥अद्वेष्टा
सर्वभूतानांमैत्रःकरुणएवच॥निर्ममोनिरहंकारःसमदुःखसुखःक्षमी २
संतुष्टःसततंयोगीयतात्मादृढनिश्चयः॥मय्यर्पितमनोबुद्धिर्योमद्भक्तःस
ख

१८वमक्तइ
२भातायां

तत्वानुसंधानं मेप्रियइति ॥ अत्रजीवन्मुक्तिरुच्यते ॥ प्रकाशंचप्रवृत्तिंचमोहमेवचपांडवगुणातीतः स
॥४५॥ जी उच्यतइत्यंतेनैवजीवन्मुक्तोदर्शितो ॥ निराशिषमनारंभंनिर्नमस्कारमस्तुतिं ।
अक्षीणंक्षीणकर्माणंतंदेवाब्राह्मणंविदुरिति ॥ महाभारते ॥ यथास्वप्नप्रपं
चोयंमयिमायाविजृंभितः ॥ एवंजाग्रत्प्रपंचोयंमयिमायाविजृंभितः ॥ इति
वेद योवेदवेदांतैःसोतिवर्णाश्रमीभवेदितिपुराणे ॥ सेयंजीवन्मुक्तिस्तत्वज्ञान
वासनाक्षयमनोनाशाभ्यासात्सिध्यति ॥ तत्रतत्त्वज्ञानस्याभ्यासो
नामपुनःपुनःकेनाप्युपायेनतत्वानुसंधानं ॥ तदुक्तं ॥ तच्चिंतनंतत्कथनमन
न्योन्यंतत्प्रबोधनं ॥ एतदेकपरत्वंचब्रह्माभ्यासंविदुर्बुधाइति ॥ यद्यपि ॥४५॥

तत्वज्ञानस्यश्रवणादिसाधनं ॥ मनोनाशस्ययोगः ॥ वासनक्षयस्यप्रतिकू
लवासनोत्पादनमिति ॥ १

तत्वज्ञानस्यापिवासनाक्षयमनोनाशाभ्यासोपेक्षितः ॥ तथापिविविदि
गो०ए: षासंन्यासिनःसोपसर्जनभूतः श्रवणाद्यभ्यासएवप्रधानः ॥ विद्वत्संन्यासिन
उ स्तुतत्वज्ञानाभ्यासोपसर्जनभूतोवासनाक्षयमनोनाशाभ्यासःप्रधानइत्य
विरोधः ॥ कृतोपास्तिकस्यमुख्याधिकारिणस्तदयेत्नाभावेप्यकृतोपास्तेरस्म
दादेस्तदभावेचित्तविश्रांत्यभावादुत्पन्नमपितत्वज्ञानंविषयाबाधात्स
मारूपमज्ञाननिवर्तकमप्यसंभावनादिसंभवान्नस्वकरमिति ॥ वास
नाक्षयमनोनाशाभ्यासोपेक्षितः ॥ वासनास्वामान्यलक्षणं ॥ तद्विभागं तत्प्र र
योजनंतल्लक्षणंचवसिष्ठआह ॥ दृढभावनयात्यक्तपूर्वापरविचारणं ॥ यदा

तत्त्वानुसंधा॰ दानंपदार्थस्य वासना सा प्रकीर्तिता ॥ वासना हि द्विधा प्रोक्ता शुधा च मलिना
॥४९॥ नो तथा ॥ मलिना जन्महेतुः स्या शुधा जन्मविनाशिनी ॥ अज्ञानसुघनाकाराघ
नाहंकारशालिनी ॥ पुनर्जन्मकरी प्रोक्ता मलिना वासना बुधैः ॥ पुनर्जन्मां
कुरं त्यक्त्वा स्थिता संभ्रष्टबीजवत् ॥ देहार्थं ध्रियते ज्ञानज्ञेया शुधेति चोच्य
तेइति ॥ तत्र मलिनेवासना जन्महेतवो नेकप्रकाराः दर्शिताः ॥ लोकवंस नाश्च॥
नयाजंतोर्देहवासनयापि च ॥ शास्त्रवासनया ज्ञानं यथावन्नैव जाय
तेइति दंभो दर्पोभिमानश्च क्रोधः पारुष्यमेव च ॥ अज्ञानं चाभिजात
स्य पार्थ संपदमासुरीमिति च ॥ योषित्पुत्रादि विषयाभिलाषाश्च मलिन ॥४९॥

वासनाकृष्टयाः ॥ विवेकदोषदर्शनसत्संगसान्निधिस्यागाप्रेंकृत्वा सन्तोस्या ति
नवास दनेनोक्तानां मलिनानामंतःकरणगतानामनुसादो वासनाक्षयाभ्यासः ॥ त ए
थैववसिष्ठादिभिर्दर्शितः ॥ हृदयासंभवबोधेन रागद्वेषादितानवं ॥ रतिर्न
वोदितायातु बोधाभ्यासं विदुः परं इति ॥ असंगोहमिति व्यवहारोस्या सक्तो ॥ त्य संगव्यवहारी
तस्य भावस्तत्वं ॥ असंगव्यवहारित्वाद्भवभावनवर्जनात् ॥ शरीरनाशद
र्शित्वाद्वासना न प्रवर्तते इति च ॥ दुःखं जन्मजरादुःखं दुःखं मस्तकं पुनः पुनः ॥
संसारमंडले दुःखं पच्यते यत्र जंतवः इतीति हासे ॥ निःसंगतामत्र विपदं
यतीनां संगादशेषाः प्रभवंति दोषाः ॥ आरूढयोगोपि निपात्यतेधः संगेन

मनोरथानां न समाप्तिरस्ति वर्षायुतेनाप्यथवापि लक्षैः ॥
पूर्णेषु पूर्णेषु पुनर्नवानामुत्पत्तयः संति मनोरथानां ॥२॥

तत्त्वानुसंधाने ॥४७॥

योगी किमकृतात्मसिद्धिरिति विष्णुपुराणे ॥ तथा भागवते ॥ संगं समजेत मिथुनव्रती
नां मुमुक्षुः सर्वात्मना न विसृजेद्बहिरिंद्रियाणि ॥ एकश्चरेद्रहसि चित्तमनं
त ईशे युंजीत तद्व्रतिषु साधुषु चेत्प्रसंग इति ॥ स्त्रीणां स्त्रीसंगिनां संगं त्यक्त्वा दू
रत आत्मवान् ॥ क्षेमे विविक्त आसीनश्चिंतयेन्मामतंद्रित इति च ॥ महत्सेवां
द्वारमाहुर्विमुक्तेस्तमोद्वारं योषितां संगिसंगं ॥ महांतस्ते समचित्ताः प्र
शांता विमन्यवः सुहृदः साधवो ये इति च ॥ तत्संगोपातित्यमाह ॥ योषिद्धि
रण्याभरणांबरादिद्रव्येषु मायारचितेषु मूढः ॥ प्रलोभितात्मा ह्युपभोगबु
द्ध्या पतंगवन्नश्यति नष्टदृष्टिरिति ॥ प्रतिकूलवासनाभिर्मैत्र्यादिवासनाभिस्त ॥४७॥

श्च दर्शिताः मैत्रीकरुणामुदि[illegible]षु तोपेक्षाणां सुखदुःखपुण्या
पुण्यविषयाणां भावनातश्चित्तप्रसादनमिति ॥ अस्यार्थः ॥ सुखिप्राणिष्वेते
मदीया इति मैत्री ॥ दुःखीप्राणिषु यथा मम दुःखं माभूदेवमन्येषामपि दुः
खं माभूदिति करुणा ॥ पुण्यकारिषु पुरुषेषु मुदितां पापेषूपेक्षां भावयतो
रागद्वेषाभ्यामदमात्सर्यादिनिवृत्त्या चित्तप्रसादो भवतीति ॥ तथा दैवी
संपदभ्यासेनासुरसंपन्नश्यति ॥ दैवीसंपद्भगवता दर्शिता ॥ अभयं सत्त्व
संशुद्धिरित्यारभ्य दैवीमभिजातस्येत्यंतेन ॥ अमानित्वमित्यादिनोक्तान्ध
र्मानभ्यसेत ॥ मानित्वादिधर्माभ्यासेन तद्विपरीतमानादयो नश्यंति ॥ तथा

तत्वानुसंधा चमैत्र्यादिवासनां संकल्पपूर्वकमभ्यस्यानंतरमजिह्मत्वादिधर्मानभ्यसेत् ॥ अ
॥४८॥ जिह्मत्वादयो दर्शिताः ॥ अजिह्मः षंडकः पंगुरंधो बधिर एव च ॥ मुग्धश्च मुच्य ग
ते भिक्षुः षड्भिरेतैर्न संशयः ॥ इदमिष्टमिदं नेति योऽश्नन्नपि न सज्जते ॥ हितं स
त्यं मितं वक्ति तमजिह्मं प्रचक्षते ॥ अद्य जातां यथा नारीं तथा षोडशवार्षिकीं ॥
शतवर्षां च यो दृष्ट्वा निर्विकारः स षंडकः ॥ भिक्षार्थमटनं यस्य विण्मूत्रक
रणाय च ॥ योजनान्न परं याति सर्वथा पंगुरेव सः ॥ तिष्ठतो व्रजतो वापि यस्य च
क्षुर्न दूरगं ॥ चतुर्युगां भुवं मुक्त्वा परिव्राट् सोऽन्ध उच्यते ॥ हिताहितं मनोरामं
वचः शोकावहं च यत् ॥ श्रुत्वापि न शृणोतीति यो बधिरः स प्रकीर्तितः ॥ सांनि ॥४८॥

२ युगप्रमाणं षडशीत्यंगुलानि।

ध्ये विषयाणां च समर्थोऽविकलेंद्रियः ॥ सुप्तवद्वर्तते नित्यं स भिक्षु
र्मुग्ध उच्यत इति ॥ तदनंतरं चिन्मात्रवासनामभ्यसेत् ॥ नामरूपात्मकस्य
जगतश्चैतन्यकल्पितत्वेन स्वतः सत्ताशून्यतया चैतन्यसत्तास्फुरणपूर्वकमेव न्य
स्फुरणं भवति ॥ तत्र नामरूपमिथ्यात्वनिश्चयेनोपेक्ष्य चिन्मात्रोऽहमिति
त्व भावयेऽमेयं चिन्मात्रवासना द्विप्रकारा कर्तृकर्मकरणानुसंधानपूर्विका
केवला चेति ॥ तत्र सर्वं जगच्चिन्मात्रमहं मनसा भावयामीति क्रियमाणा प्रथ
मा सा सप्रज्ञातसमाधिकोटावंतर्भवति ॥ कर्तृकर्मकरणानुसंधानरहिता
चिन्मात्रोऽहमिति भावना केवला ॥ सर्वस्य चिन्मात्रत्वं श्रुतेर्बलिभिस्त्वपदि

तत्त्वानुसंधा॰ ष्ट॥ चिदिदानींदृश्यंचिन्मात्रंसर्वंचिन्मयमेवतत॥ चित्त्वंचिदहमेतेचलोकाश्चि
॥४९॥ दितिसंग्रहः॥ द्वितीयासंप्रज्ञातसमाधिकोटावंतर्भवति॥ तस्यांचिन्मात्रवास
नायांदृढतयाभ्यस्तायांपूर्वोक्तमलिनवासनाः सर्वाः क्षीयंतेयथावासनाक्षया ॥न्य
भ्यासः॥ जतुकस्वर्णादिवस्त्रावयवंकामादिवृत्तिरूपेणपरिणममानमंतःकर
णं॥ मननात्मकत्वात्मनः॥ तच्चसत्वरजस्तमोगुणात्मकं॥ तदाश्रयत्वेनसत्व
रजस्तमोविकाराणां॥ सुखदुःखमोहादीनामुपलंभात्॥ रजस्तमोवृत्तिनि
रूपचीयमानमंतःकरणंपीनमात्मदर्शनायोग्यंभवतीत्यतस्तदर्थंवृत्तिनि
रोधेनसूक्ष्मतापादनंमनसोनाशाइत्युच्यते॥ तत्साधनानिदर्शितानि॥ अध्या ॥५५॥

त्मविद्याधिगमःसाधुसंगमएवच॥ वासनासंपरित्यागः प्राणस्पंदनिरोधनं॥
एतास्तायुक्तयःपुष्टाःसंतिचित्तजयेकिलेति॥ प्राणनिरोधोपायादर्शितः॥ प्राणा
यामहठाभ्यासाधनत्वाचगुरुदत्तया॥ आसनाशनयोगेनप्राणस्पंदोनिरुध्यत
इति॥ प्राणायामप्रकारोदर्शितः॥ इडयापिबषोडशाभिः पवनंचतुरुत्तरषष्टि
कमौदरिकं॥ त्यजपिंगलयाशनकैःशनकैर्दशभिर्दशभिर्द्व्यधिकैरिति॥ इ दशभि
डयावामनासिकयापिबपूरयत्यजरेचयपिंगलयादक्षिणनासी[illegible]क
येत्यक्षरार्थः॥ प्राणायामस्यमनोनाशोपायत्वंस्फुटावप्युक्तं॥ प्राणान्प्रपी
ड्येहसंयुक्तचेष्टः क्षीणेप्राणेनासिकयोच्छ्वसीतदुष्टाश्वयुक्तमिववाहमेनंवि

तत्त्वानुसंधा॰ ह्यात्मनो धारयेत्ता॥ प्रमत्त इति॥ आसनं योगांगत्वं साधनं तत्फलं च पतंजलिरस्म

॥५८॥ रयत्॥ स्थिरसुखमासनं॥ प्रयत्नशैथिल्यानंतसमापत्तिभ्यां ततो द्वंद्वानभि

घात इति॥ प्रयत्नशैथिल्यं लौकिकवैदिककर्मत्यागः फणासहस्रेण धरणीं

धृत्वा येनंतो वर्तते स एवाहमस्मीत्यनुसंधानमनंतसमापत्तिस्ताभ्यामासन

प्रतिबंधकदुरितं क्षीयते॥ आसनाभ्यासस्य फलं द्वंद्वानिवृत्तिः॥ अज्ञानयोगो

पि दर्शितः॥ द्वौ भागौ पूरयेदन्नं जलेनैकं प्रपूरयेत्॥ मरुतः प्रचारार्थं स्य

चतुर्थमवशेषयेदिति॥ एवं प्राणायामादिना प्राणस्पंदनिरोधे खिलचि ॥५०॥

त्तवृत्तयो निरुध्यंते॥ प्राणस्पंदाधीनत्वाच्चित्तवृत्त्युदयस्य॥ ततश्च स्वभा

वत आत्मानात्माकारमंतःकरणमनात्माकारवृत्तिनिरोधादात्मैकाकारं भव

ति॥ यथाहुः॥ आत्मानात्माकारं स्वभावतो वस्थितं सदा चित्तं॥ आ[त्मै]काकार

तयातिरस्कृतानात्मदृष्टि विद[धी]तेति॥ अयमेव योगः॥ यथाहुः॥ योगश्चित्त

वृत्तिनिरोध इति॥ तत्साधनं चाहुः॥ अभ्यासवैराग्याभ्यां तन्निरोध इति॥ भगवा

नपि तथाह॥ असंशयं महाबाहो मनो दुर्निग्रहं चलं॥ अभ्यासेन तु कौंतेय

वैराग्येण च गृह्यत इति॥ वैराग्यं निरूपितं॥ निरोधो द्विविधः संप्रज्ञातोसं

तत्र प्रज्ञातश्चेति॥ कर्त्राद्यनुसंधानं वित्तालंब्यैक[गो]चरप्रत्ययप्रवाहः संप्रज्ञा

तसमाधिः॥ स्याद्ध्यानाभ्यासप्रकर्षज इति॥ अस्य संप्रज्ञातसमाधेरंगिनो

यथाहुः॥ विलाप्य विकृतिं कृत्स्नां संभवव्यत्ययक्रमात्॥ परिशिष्टं तु चिन्मात्रं चिदानंदं विचिं

तयेत्॥१॥ ब्रह्माकारमनोवृत्तिप्रवाहोऽहं कृतिं विना॥ संप्रज्ञातसमाधिः

तत्वानुसंधा. यमादीन्यष्टांगानि ॥ तत्र यमनियमासनप्राणायामप्रत्याहारा बहिरंगाणि ॥ अ
॥५२॥ हिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः ॥ अष्टांगमैथुनवर्जं ब्रह्मचर्यं ॥ यथा
हुः ॥ स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणं ॥ संकल्पोऽध्यवसायश्च क्रियानिर्वृत्ति
रेव च ॥ एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः ॥ विपरीतं ब्रह्मचर्यमनुष्ठेयं मुमु मैत्रदेवाख्यस हंग
क्षुभिः ॥ सत्संगासंनिधित्याग दोषदर्शनतो भवेदिति ॥ अत एव स्त्रीसंभाषणादि
निषेधोपि मुमुक्षूणां ॥ न संभाषेत्स्त्रियं कांचित्पूर्वदृष्टां च न स्मरेत् ॥ कथां
च वर्जयेत्तासां न पश्येल्लिखितामपीत्यादिस्मृतेः ॥ शौचसंतोषतपःस्वा
नि ध्यायेश्वरप्रणिधानानि नियमाः ॥ आसनं निरूपितं ॥ तच्च पद्मस्वस्तिकाद्यनेक ॥५१॥

प्रकाररेचकपूरककुंभकाः प्राणायामाः ॥ इंद्रियाणां विषयेभ्यो निवर्तनं प्रत्याहा
रः ॥ एतेषु बहिरंगेषु जितेष्वंतरंगेषु यत्नः कर्तव्यः ॥ धारणाध्यानसमाधयः संप्रज्ञा
तसमाधेरंतरंगसाधनानि ॥ धारणा नाम मूलाधारमणिपूरकस्वाधिष्ठानाना
हताज्ञाविशुद्धिचक्रदेशानामन्यतरस्मिन्नुपस्थात्मनि वा चित्तस्य स्थापनं ॥
५त्य तदेकस्मरणमिति यावत् ॥ ध्यानं नाम तत्र प्रत्ययैकतानता ॥ ध्येयैकगोचरप्रत्य ना
यप्रवाह इत्येतत् ॥ प्रत्ययप्रवाहो द्विविधः ॥ विजातीयप्रत्ययान्तरितस्तदनं
तरितश्चेति ॥ आद्यो ध्यानं द्वितीयः समाधिः सोपि द्विविधः ॥ कर्त्राद्यनुसंधान
पूर्वकस्तद्रहितश्चेति ॥ आद्योंगसमाधिः ॥ द्वितीयोंगी१ ॥ संप्रज्ञातसमाध्युद

१संप्रज्ञातसमाधिः

तिच

तत्वानुसंधा येलयविक्षेपकषायरसास्वादाख्याश्चत्वारोविघ्नाःसंति ॥ लयोनिद्रा ॥ पुनःपुन विषया
॥५२॥ नुसंधानंविक्षेपः ॥ चित्तस्यरागादिनास्तब्धीभावः कषायः ॥ समाध्यारंभसमयेसवि
कल्पकानंदास्वादोरसास्वादः ॥ यथाहुः ॥ लयेसंबोधयेच्चित्तंविक्षिप्तंशमयेत्पुनः ॥ तू
सकषायंविजानीयात्समप्राप्तंनचालयेत् ॥ नास्वादयेद्रसंतत्रनिःसंगः प्रज्ञयाभ
ति वेदित्यस्यार्थः ॥ प्राणायामादिनालयान्निष्क्रम्यचित्तमुत्थापयेत् ॥ दोषदर्शन
धा ब्रह्मानुसंधानादिनाविक्षिप्तंचित्तंशमयेत् ॥ ब्रह्मसंप्राप्तंचित्तंनचालयेत् ॥ समा
ध्यारंभसमयेसविकल्पकानंदंनास्वादयेत् ॥ किंतूदासीनब्रह्मप्रज्ञयायुक्तो उ
भवेदिति ॥ एवंनिर्विघ्नेनसंप्रज्ञातसमाध्यभ्यासेनाध्यात्मप्रसादमापन्नेमन ॥५२॥

मनसोवृत्तिशून्यस्यब्रह्माकारतयास्थितिः ॥ असंप्रज्ञातनामासौसमाधिरभिधीयते ॥१॥ ओ ४

सिकृतंभराप्रज्ञोदेति ॥ अतीतानागतविप्रकृष्टव्यवहितसूक्ष्मवस्तुविषयंयोगिन
स्संकृतंभराप्रज्ञा ॥ तामपिनिरुध्यसमाधिमभ्यस्यतोगुणवैतृष्ण्यंपरंवैराग्यमु
देतितच्चनिरूपितं ॥ ततोप्यभ्यासः कर्तव्यः ॥ आदरप्रयत्नोभ्यासः ॥ यथाहुः ॥ तत्र ३
यत्नो स्थितौभ्यासइति ॥ तस्यापिनिरोधेसर्वधीनिरोधोभवति ॥ अयमेवासंप्रज्ञातस
माधिः ॥ नकेवलंपरवैराग्यादेवसमाधिलाभः ॥ किंत्वीश्वरप्रणिधानादपि ॥ तथा ई
चोक्तं ॥ ईश्वरप्रणिधानाद्वाक्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषई
श्वरः ॥ तस्यवाचकः प्रणवस्तज्जपस्तदर्थभावनमिति ॥ एतदुक्तंभवति ॥ ई ई
श्वरप्रणिधानाद्वासमाधिलाभः ॥ क्लेशादिभिरसंबंधः सर्वज्ञः सर्वशक्तिरीश्व

नत्वानुसंधा र: ॥ ईश्वरस्याभिधायक: शब्द: प्रणव: ॥ प्रणवजपेमांडूक्योपनिषत्पंचीकरणतत्वादि
॥५३॥ कोक्तप्रकारेणप्रणवार्थानुसंधानंचेश्वरप्रणिधानं ॥ अथवातत्वोदंसोसौयोसौ
सोहमस्मित्यत्रसशब्देनपरमात्मोच्यते ॥ हंशब्देनप्रत्यगात्मोच्यते ॥ अनयो:शब्द
यो:सामानाधिकरण्यात्ब्रह्मात्मैक्यमुच्यते ॥ ततश्चसोहमस्मित्यस्यपरमात्माह
मित्यर्थोयथा ॥ तथाप्रणवस्यापि ॥ तथाहिसोहमित्यत्रसकारहकारलोपेक
॥५४॥ तेपरिशिष्टयोरोअमित्यनयो:संधिंकृत्योच्चारणेओमितिशब्दंनिष्पन्न: ॥ तदु
हकारंच क्तं ॥ सकारंचलोपयित्वाप्रयोजयेत् ॥ संधिंचपूर्वरूपाख्यंततोसौप्रणवोभवे ॥५३॥
दिति ॥ ततश्चोमित्यस्यशब्दस्यरमात्माहमित्यर्थ: ॥ सर्वथापिप्रणवजप
प

णि ह्य
प्रणवार्थानुसंधानरूपेणेश्वरप्रधानेनपरमेश्वरानुग्रहात्समाधिलाभोभवत्येव ॥ एवं
समाध्यभ्यासेनांत:करणस्यातिसूक्ष्मतापादनंमनोनाशइत्युच्यते ॥ अनेनतत्पदं
ग्मनसात्वंपदलक्ष्येसाक्षात्कृतेमहावाक्येनस्वस्यब्रह्मत्वसाक्षात्कारोभवति ॥
नकेवलंसमाधिनैवब्रह्मसाक्षात्कार: ॥ किंतुविवेकेनापिभवति ॥ अंत:करण
तद्वृत्तीनामवभासकोयश्चिदात्मासाक्षीतस्मिन्साक्षी ॥ लक्षिते ॥ वाक्याद्ब्र
ह्मसाक्षात्कार: संभवत्येवतदाह ॥ द्वौक्रमौचित्तनाशस्ययोगोज्ञानंचराघव
योगोवृत्तिनिरोधोहिज्ञानंसम्यगवेक्षणं ॥ असाध्य:कस्यचिद्योग:कस्यचिज्ज्ञा ६
ननिश्चय: ॥ प्रकारौद्वौततोदेवोजगादपरमेश्वर इति ॥ ज्ञानंविवेक: ॥ तृतीया

तत्त्वानुसंधा॰ ध्याये ॥ इंद्रियाणिपराण्याहुरित्यारभ्यकामरूपंदुरासदमित्यंतेनविवेकं ॥ षष्ठे
॥५४॥ ध्यायेयोगंचयत्सांख्यैःप्राप्यतेस्थानंतद्योगैरपिगम्यतइतिवा ॥ देवःपरमेश्वरः
सर्वज्ञःभगवान्द्वैरमकारोजगादेति ॥ श्लोकार्थः ॥ तदेवंतत्वज्ञानवासनाक्षयम
नोनाशाभ्यासाज्जीवन्मुक्तिःसिध्यतीतिसिद्धं ॥ तस्याजीवन्मुक्तेःपंचप्रयोज
नानिसंति ॥ ज्ञानरक्षातपोविसंवादाभावोदुःखनिवृत्तिःसुखाविर्भावश्चे
ति ॥ तत्रोत्पन्नब्रह्मसाक्षात्कारस्यपुंसःपुनःसंशयविपर्ययानुत्पादोज्ञानर
क्षा ॥ तथाहि ज्ञानिनांशुकराघवनिदाघादीनामिवाकृतोपास्तेर्ज्ञानिनो
स्म दादेश्छिन्नविभ्रांत्यभावात्पुनःकदाचित्संशयविपर्ययौसंभवेतांमज्ञा ॥५४॥

नवत्त्वादिमोक्षप्रतिबंधकौ ॥ तदाहभगवान् ॥ अज्ञश्चाश्रद्दधानश्चसंशयात्मा
विनश्यतीति ॥ ततश्चजीवन्मुक्त्यभ्यासेनसंभावितसंशयविपर्ययनिवृत्तिः
ज्ञानरक्षानामप्रथमंप्रयोजनं ॥ चित्तैकाग्र्यंतपः ॥ मनसश्चेंद्रियाणांचह्यैकाग्र्यं
परमंतपः ॥ सज्यायःसर्वधर्मेभ्यःसधर्मःपरउच्यतेतिस्मरणात् ॥ ज्ञानिनोजीवन्मु
चित्र क्तस्याविकल्पैवृत्तिनामनुदयात् ॥ निरंकुशंचित्तैकाग्र्यंसंपद्यतेतदेवतपः ॥ त
च्चलोकसंप्रदायन्नवति ॥ तदुक्तं ॥ लोकसंग्रहमेवापिसंपश्यन्कर्तुमर्हसीति ॥
संग्राह्योलोकस्त्रिविधः ॥ शिष्योभक्तस्तटस्थश्चेति ॥ तत्रसन्मार्गवर्तीशिष्यो
गुरूपदिष्टमार्गेणश्रवणादिनाब्रह्मसाक्षात्कुर्वन्नुच्यते ॥ आचार्यवानुरु

तत्वानुसंधा॰ ॥५५॥

षोवेदतस्यतावदेवचिरंयावन्नविमोक्ष्येथसंपत्स्यइतिश्रुतेः॥ भक्तोपिज्ञानिनः
पूजान्नपानादिनाभीष्टंप्राप्नोति॥ तथाचश्रुतिः॥ यंलोकंमनसासंविभातिवि यं
शुद्धसत्वःकामयतेयांश्चकामान्॥ तंतंलोकंजयतेतांश्चकामांस्तस्मादात्मज्ञं
ह्यर्चयेद्भूतिकामइति॥ स्मृतिरपि॥ यद्येकोब्रह्मविद्भुंक्तेजगत्तत्तर्पयतेखिलं॥ त
स्माद्ब्रह्मविदेदेयंयद्यस्तिवस्तुकिंचनेत्यादि॥ तटस्थोपिद्विविधः॥ सन्मार्गवर्ती
सन्मार्गवर्तीचेति॥ तत्रसन्मार्गवर्तीमुक्तस्यसदाचारप्रवृत्तिंदृष्ट्वास्वयम
जगवान् पितत्रप्रवर्तते॥ तदाह॥ यद्यदाचरतिश्रेष्ठस्तत्तदेवेतरोजनः॥ सयत्प्रमाणं
६ कुरुतेलोकस्तदनुवर्ततइति॥ असन्मार्गवर्तीजीवन्मुक्तस्यदृष्टिपातेनस ॥५५॥

र्वपापैःप्रमुच्यतेइति॥ तथाचस्मृतिः॥ यस्यानुभवपर्यंताबुद्धिस्तत्वेप्रवर्तते॥ तद्दृ
ष्टिगोचराःसर्वेमुच्यंतेसर्वकिल्बिषैरिति॥ द्वेषिणस्तुज्ञानिनोदुःखंतंसंभावितं
तथचश्रुतिः॥ गच्छंति॥ तस्यपुत्रादायमुपयंतिसुहृदःसाधुकृत्यांद्विषंतःपापकृत्यामिति॥
एवंजीवन्मुक्तस्यतपोलोकसंग्रहायभवतीति॥ तयोनामद्वितीयंप्रयोजनं॥ जी
वन्मुक्तस्यबुस्यानदत्तगयांकर्मठादिव्रातकृतनिंदादिश्रवणेपिपाखंडेक
तनिष्ठुरादिदर्शनादावपिचित्तवृत्तनुदयाद्विसंवादोनभवति॥ यथाहुः
ज्ञात्वावयंतत्वनिष्ठान्नानुमोदामहेवयं॥ अनुज्ञोचामगवान्यान्नत्वातैर्वि
ददामहइति॥ विसंवादाभावोनामतृतीयंप्रयोजनं॥ दुःखनिवृत्तिर्द्विवि

तत्त्वानुसंधा॰ ॥५८॥

धा॥ऐहिकदुःखनिवृत्तिरामुष्मिकदुःखनिवृत्तिश्चेति॥तत्रज्ञानेनभ्रांतिनिवृत्ति
तयायोगाभ्यासेनाखिलवृत्तिनिरोधेनचित्तस्यात्मैकाग्रतयैहिकसमस्तदुःख का
निवृत्तिःप्रारब्धभोगेसत्यपि॥तथाचश्रुतिः॥आत्मानंचेद्विजानीयादित्यादिनै
हिकदुःखनिवृत्तिर्मुक्तस्यदर्शयति॥ज्ञानेनाज्ञाननिवृत्त्यासंचितागा
मिकर्मणामशेषविनाशाभ्यामामुष्मिकदुःखानामपिनिवृत्तिः॥तथाचश्रुतिः॥
॥५८॥ एतंहवावनतपतिकिमहंसाधुनाकरवंकिमहंपापमकरवमित्यादि ॥५८॥
दुःखनिवृत्तिर्नामचतुर्थंप्रयोजनं॥मुक्तस्यज्ञानयोगाभ्यासाज्ञानतत्त्व द
तावरणविक्षेपनिवृत्त्याबाधकाभावात्परिपूर्णब्रह्मानंदानुभवस्सुखावि ॥५८॥

र्भावः॥इममेवार्थंश्रुतिर्दर्शयति॥समाधिनिर्धूतमलस्यचेतसो निवेशितात
स्यात्मनियत्सुखंभवेत्॥नशक्यतेवर्णयितुंगिरातदास्वयंतदंतःकरणेनगृ
ह्यतइति॥सुखाविर्भावोनामपंचमंप्रयोजनं॥एवंस्वरूपप्रमाणसाधनफल
निरूपणेनद्विविधामुक्तिर्निरूपिता॥तस्माद्ब्रह्मविज्जीवन्मुक्तोभोगेनप्रारब्धक
र्मणिक्षीणेवर्तमानशरीरपातेखंडैकरसब्रह्मानंदात्मनावतिष्ठते॥नतस्य
प्राणाउत्क्रामंत्यत्रैवसमवलीयंतेब्रह्मैवसन्ब्रह्माप्येति॥ब्रह्म वेदब्रह्मैवभ द
वति॥विभेदजनकेज्ञानेनाशमात्यंतिकंगते॥आत्मनोब्रह्मणोभेदमसंतंकःक
रिष्यति॥तद्भावभावमापन्नस्ततोसौपरमात्मनः॥भवत्यभेदीभेदश्चतस्या

दित्या

तत्वानुसंधा· ज्ञानकृतो न वेदि श्रुतिस्मृतिशतेभ्यः ॥ भगवानुमुत्र कारणप्रकृक्तः ॥ अस्मिन्नस्य
॥५७॥ तद्योगं नास्तीति ॥ तस्मादहं ब्रह्मास्मीतितत्त्वमस्यादिवाक्यजन्यज्ञानाद्ब्रह्मभा
वलक्षणो मोक्षो भवतीति सिद्धं ॥ न च पुनरावर्तते ॥ तद्बुध्यस्तदात्मानस्तन्नि
ष्ठास्तत्परायणाः ॥ गच्छंत्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषा इत्यादिश्रुतिस्मृ
तिभ्यः ॥ श्रीमत्स्वयंप्रकाशात्मगुरूणां करुणावशात् ॥ उपदिष्टं परात्मैकतत्त्व
मावेदितं मया ॥ १ ॥ ब्रह्मेन्द्रविष्ण्वादिसमस्तदेवास्वस्वाधिकारेषु विनीतचित्ताः
आज्ञावशाद्यस्य वसंति सर्वे तं दक्षमाद्यं शरणं प्रपद्ये ॥ २ ॥ या भारती निर्वि
रंचिविष्णुदेवादिभिर्नित्यमुपास्यमाना ॥ सदाक्षमालांविलसत्कराभ्यां वागवा ॥५७॥

दिनीं तां शरणं नमामि देवीं ॥ ३ ॥ आकाशपुष्पमिव विश्वमहं निरीक्षे येनास्मिन्नि
स्वसुखबोधरसामृताब्धौ ॥ मत्स्यं च मद्वयमनंतसुखैकबोधं साक्षात्करोमि
पदनावनयाशुरूणां ॥ ४ ॥ यत्पादयुग्मकमलाश्रयणं विना हं संसारसिंधु
पतितः सुखदुःखभाक्स्यां ॥ यत्पादयुग्मकमलाश्रयणात्कृतार्थोस्मि देशि
कांघ्रिममलं प्रणतोस्मि नित्यं ॥ ५ ॥ परमसुखपयोब्धौ मग्नचित्तो महेशो हरि
३ विधिसुरसुखवादेशिकं देशमात्रं ॥ जगदपि न विजानत्पूर्णसत्यात्मसंवित्सु
खतनुरहमात्मा सर्वसंसारशून्यः ॥ ६ ॥ यद्गुकुलवरत्वं देहमन्याश्च देवान्म
नुजपशुमृगादीन्नूर्जलस्थादीन्नजाने ॥ परमसुखमखंडं मञ्जनाशात्मयाहं स

गलितनिखिलभेदःसत्यबोधैकरूपः ७ इतिश्रीपरमहंसपारिव्राजकाचार्यश्री
मत्स्वयंप्रकाशानंद सरस्वतीपूज्यपादशिष्यभगवन्महादेवसरस्वतीमुनि
विरचितंतत्वानुसंधानंसमाप्तं॥ श्रीछे॥ ॥श्रीछे॥ ॥श्रीछे॥श्रीछे॥ ॥
संवत १८४९ शाके १७१४ पौषशुदि १ बुधेसमाप्तं॥ यादृशंपुस्तकंदृष्ट्वातादृशं
लिखितंमया यदिशुद्धमशुद्धंवाममदोषोनविद्यते॥ श्रीछे॥ ॥श्रीछे॥ ॥
॥श्रीछे॥ ॥श्रीछे॥ ॥श्रीछे॥ ॥श्रीछे॥ ॥श्रीछे॥ ॥श्रीछे॥ ॥श्री
ग्रंथसंख्या ८१३ अक्षर १८॥